MADRAS ORIENTAL SERIES No. 2.

# VĪṆĀVĀSAVADATTAM

EDITED BY

DR. C. KUNHAN RAJA M.A., D. PHIL.,

*Professor of Sanskrit, University of Madras.*

PUBLISHED IN

THE JOURNAL OF ORIENTAL RESEARCH,

MADRAS

1927

PRINTED AT
THE MADRAS LAW JOURNAL PRESS,
MYLAPORE, MADRAS.

# VĪṆĀVĀSAVADATTAM.

## (Act IV)

EDITED BY

DR. C. KUNHAN RAJA,

*Head of the Department of Sanskrit,*

*University of Madras.*

## PREFACE.

The first three Acts of the drama, Vīṇāvāsavadatta were published as a supplement to the Journal of Oriental Research, Madras, in the years 1928 to 1931 and again, in book-form, in Madras Oriental Series No. 2, in 1931—by the M. L. J. Press, Mylapore, Madras. That edition was based on a manuscript which is deposited in the Government Oriental Manuscripts Library, Madras.[1] This is a transcript from a palm leaf Malayalam manuscript. It is found that in the Adyar Library there is a palm leaf manuscript of the work,[2] which too breaks off in the beginning of the fourth Act. There is not much difference in reading between the transcript in the Government Oriental Manuscripts Library and the manuscript in the Adyar Library.

In the year 1929, I came across another manuscript of the drama. It is a small palm leaf manuscript written in Malayalam characters. It is a very old one, considerably injured and worm-eaten; some leaves are missing and others are broken. From this manuscript it is found that the drama is in eight Acts. I took a copy of it; at this stage of publishing the work, I am not able to get at the original and I am publishing the drama from the copy that I had made about eight years ago.

I contributed a short paper to the Sixth Session of the All-India Oriental Conference held at Patna in 1931, in which I had given some information about the drama.[3] For various reasons I was not able to work up the subject. The material available

1. R. No. 2784.
2. Adyar Library, XXII—P.—24.
3. Proceedings of the Conference, p, 593.

for an edition is very meagre. But I feel that even the scanty material available is of importance and I am publishing the portions beginning with the fourth Act.

There is a manuscript called the Vatsarājaprabandha in the Government Oriental Manuscripts Library[1]; this is a collection of all the verses in the drama, with a short introductory portion and a short conclusion in verses, added to it. The manuscript is very corrupt and it is of little assistance in reconstructing the text; the readings are full of mistakes. I am giving the readings of this manuscript.[2] This manuscript is of real help only in portions where there are breaks in the manuscript of the drama now utilised for this edition.

If more manuscript material comes in, I will re-edit the entire matter. Till now my efforts to get at manuscripts have ended in disappointment, though I have often been told that complete manuscripts are available.

I know that this edition does not deserve the name of "edition". It is only a reprint from a manuscript. But since for this portion there is only a single decayed manuscript, I thought that even this fragment will be of some interest. With the material just now published one can have a general idea of the trend of the drama. In this matter, the collection of verses in the Vatsarājaprabandha is a great help, since all the verses are available in this work. The mistakes in the prākṛt portion are greater than in the Sanskrit portion, so far as this manuscript is concerned, and I have printed the matter eaxctly as I have found it in the manuscript. There are very few places where I was able to correct the mistakes and to reconstruct the proper text.

---

1. R. No. 4334.
2. They are printed separately at the end of each Act.

श्रीः

# वीणावासवदत्तं[1] नाम नाटकम् ।

(नान्द्यन्ते तत. प्रविशति सूत्रधारः)[2]

सूत्रधारः—जयति गिरिसुतास्तनावमर्दप्रविरलभस्मविराजिपीनवक्षाः ।
स्वशरहुतवहे हुतासुरश्रीः पितृवनरङ्गमहानटस्त्रिनेत्रः ॥

(परिक्रम्य नेपथ्याभिमुखमवलोक्य)

आर्ये ! इतस्तावत् ।

(प्रविश्य)

नटी—[१]अय्य ! इअं ह्मि ।

सूत्र—आर्ये ! त्वद्गीतप्रसादिते रङ्गे किञ्चिन्नाटकमारब्धुमिच्छामि ।[3]

नटी—[२]असमत्था विअ अहं अज्ज गाइदुम् ।

सूत्र—किन्नु खलु कारणम् ? (विचिन्त्य) आः ज्ञातम् । कन्याप्रदानं प्रति मामनादरं मन्यसे ।

नटी—[३]दिट्ठिआ दाणिं वि सुमरिदम् ।

सूत्र—आर्ये ! अलमतित्वरया । कुतः—

विवाहो जन्म मरणं यत्र येन यदा भवेत् ।
तत्र तेन तदैवैतज्जायते किल नान्यथा ॥

---

१. आर्य ! इयमस्मि ।
२. असमर्थेवाहमद्य गातुम् ।
३. दिष्टयेदानीमपि स्मृतम् ।

---

1. There is nothing in the body of the manuscript to warrant this title. This is the name by which the work is known to the owner of the ms. There was a card tagged on to the ms. with this name.

2. This is one of the so-called "Bhāsa features"

3. Cf. Pratijñāyaugandharāyaṇa. तव गीतप्रसादिते रङ्गे वयमपि प्रकरणमारभामहे. The names of the author and of the work are not given.

**नटी**—[1]अलं एरिसेण उत्तरेण । सम्पत्तजोव्वणा सा दारिआ । बहुआ तं पत्थयन्तो । अणुरूवेसु कुलेसु कण्णाणं विवाहो कादव्वो ।

**सूत्र**—यद्येवं व्रतनियमोपवासैर्भगवन्तं महेश्वरमाराध्य तदभिप्रेताय दास्यामि । कुतः—

नृपमौलितलस्थाज्ञो जिष्णुरक्षौहिणीपतिः ।
[व्रतादि][1]तावत्प्रद्योतः कर्तुमारब्धवान् यथा ॥

(निष्क्रान्तौ)

स्थापना[2] ॥

(ततः प्रविशति शालङ्कायनो वसुवर्मा च)

**शाल**—वसुवर्मन्! सर्वेष्वपत्येषु वासवदत्तां प्रत्यतिस्नेहता[3] महाराजस्य । कुतः—

[4]तामश्मकेश्वरसुतस्य सुनिश्चितोऽपि[5] दातुं पुनः प्रबलहार्दतया निवृत्य ।
दास्यामि यद्यनुमतं भगवान् प्रदद्यात्तत्रेति शम्भुमभिराधयितुं प्रवृत्तः ॥

**वसु**—कथमिव तस्यामतिरेकस्नेहो[6] महाराजो न स्यात् । सा हि—

सौभाग्यश्रीविनयमधुरालापचातुर्यलज्जा-
लीलादीनां परमवनिताभूषणानां गुणानाम् ।
मञ्जूषेव क्षितिपवृषभे साध्विमां पालयेति
न्यस्तान्यत्र व्ययबहुलतां नेच्छता भूतधात्रा ॥

**शाल**—भोः कथाप्रसङ्गादविदितान्तरालमार्गाः प्रविष्टास्स्मश्चित्रमण्डपम् ।

(उभौ परिक्रम्य तिष्ठतः)

(प्रविश्य)

**प्रतीहारी**—[2](सहर्षम्) अह्मो भट्टिणो [7]इस्सिविणदस्सणप्पवुत्तपीदिप्पवाहभरिददाए-

---

१. अलमीदृशेनोत्तरेण । संप्राप्तयौवना सा दारिका । बहवस्तां प्रार्थयमानाः । अनुरूपेषु कुलेषु कन्यकानां विवाहः कर्तव्यः ।

२. अहो ! भर्तुः स्वप्नदर्शनप्रवृत्तप्रीतिप्रवाहभरिततया त्वरमाणाप्यहं न पारयामि शीघ्रं गन्तुम् । अहो ! अमात्य आर्यशालङ्कायनो वसुवर्मा च । भवतु । प्रियं निवेदयिष्यामि । अपि सुखमार्याणाम् । भर्तुरभिप्रेत-स्वप्नदर्शनेन वर्धापयन्तु ।

---

1. Three syllables are missing. To fit into the metre there must be ⏓ – ⏑. I suggest व्रतादि

2. This is another "Bhāsa feature."

3. अतिस्निग्धता or स्नेहातिरेकः is more idiomatic.

4. Cf. Pra. अतिलोभाद्वरगुणानामतिस्नेहाच्च वासवदत्तायां न शक्नोमि निश्चयं गन्तुम्

5. This incident is not seen in Pra.

6. स्नेहातिरेको महाराजस्य will be happier.

7. सिविण?

तुवरन्ती वि अहं ण पारेमि सिग्घं गन्तुम् । (इति परिक्रम्य) अम्मो अमच्चो अय्य सालङ्कायणो वसुवम्मा अ । भोदु । पिअं णिवेदइस्सम् । (उपेत्य) सुहं अय्याणम् । भट्टिणो अभिप्पेदसिविणदस्सणेण वड्ढावीअदु [न्तु] ।

**उभौ**—एवंरूपाणां प्रियाख्यानशतानां निवेदिकैव भवतु भवती ।

**शाल**—भवति ! कुत्र खलु वर्तते महाराजः ?

**प्रती**—[1]सुणादु अय्यो सव्वम् । णियमगिहादो णिग्गच्छिअ भट्टा ह्णाणगिहं पविसिअ सोव्वण्णपदुमपीठमज्झगओ रदणसिरीससिद्धत्थकुसुमगब्भेहिं मन्तपूदविमलसीदलसुरभिसलिलसम्पुण्णेहिं मङ्गलकलसेहिं ह्णाइअ किदमङ्गलसोत्थिविहाणो अहदक्खोमणिवसणो हुदग्गिहोत्तो पुव्वोद्दरदिसाभाए कणअभद्दपीठे पुव्वमुहमुववसिअ अह्माणत्तसमुदीरिदेसु मङ्गलपडहतुरेसु [रयेसु] पुरोहिदप्पमुहाणं वहुणं रदणपुण्णपाणीणं हेमासणगदाणं जहादिट्ठं सिविणं णिवेदिअ तेहिं सव्वेहिं पसादुप्फुल्लवदणेहिं साहु साहु सफलो त्ति पुणो पुणो पसंसिअसिविणो विसज्जिअ तं जहाणुरूवं दुजादिजणं अय्येण भरदरोहएण सह कणअप्पासादादो ओदरइ ।

**शाल**—विजयाय ।

**वसु**—कुत्र पुनस्त्वं प्रस्थितासि ?

**प्रती**—[2]सव्वेसु देवाअदणेसु सविसेसा अज्ज पूआ कादव्वत्ति कंचुईअस्स भवरादस्स णिवेदेदुम् ।

**शाल**—साधु, युक्तमेतत् । गम्यताम् ।

**प्रती**—[3]अहं खु भट्टिणो आणत्तिं अणुचिट्ठिस्सम् ।

(निष्क्रान्ता)

**शाल**—(विलोक्य) अये ! अयं महाराजः ।

१. शृणोत्वार्यः सर्वम् । नियमगृहान्निर्गत्य भर्ता स्नानगृहं प्रविश्य सौवर्णपद्मपीठमध्यगतो रत्नशिरीषसिद्धार्थकुसुमगर्भैर्मन्त्रपूतविमलशीतलसुरभिसलिलसम्पूर्णैर्मङ्गलकलशैः स्नात्वा कृतमङ्गलस्वस्तिविधानोऽहतक्षौमनिवसनो हुताग्निहोत्रः पूर्वोत्तरदिग्भागे कनकभद्रपीठे प्राङ्मुखमुपविश्य अस्मदाज्ञासमुदीरितेषु मङ्गलपटहतूर्येषु [तूर्येषु] पुरोहितप्रमुखाणां बहूनां रत्नपूर्णपाणीनां हेमासनगतानां यथादृष्टं स्वप्नं निवेद्य तैः सर्वैः प्रसादोत्फुल्लवदनैः साधु साधु सफल इति पुनः पुनः प्रशंसितस्वप्नो विसृज्य तं यथानुरूपं द्विजातिगणमार्येण भरतरोहकेण सह कनकप्रासादम् अवतरति ।

२. सर्वेषु देवायतनेषु सविशेषाद्य पूजा कर्तव्येति कांचुकीयस्य भवरातस्य निवेदयितुम् ।

३. अहं खलु भर्तुराज्ञामनुष्ठास्यामि ।

सितशाचेरदुकूले निर्गतः खेलगामी नरपतिरुपवासक्लान्तदेहो विमानात् ।
कनकगिरिगुहान्ताद्गन्धहस्तीव गौरः प्रचुरमदविसर्गात्किञ्चन क्षामगात्रः ॥

(ततः प्रविशति राजा भरतरोहकश्च)

राजा—सखे भरतरोहक! मया सुखमिति वासवदत्तां दातुमेव संश्रितो मार्गः । वरप्रदानादपि दुःखे पुनर्मामभियोजितवान् भगवान् भवः ।

भर—स्वामिन्! शम्भोः प्रसादात्तदकृच्छ्रेणैव सिध्यति ।

राजा—तथास्तु ।

भर—देव! उपवासश्रान्ततया न युक्तमिह चिरं स्थातुम् ।

(राजा आसनमारोहति)

शालङ्कायनवसुवर्माणौ—विजयतां देवः ।

शाल—अभिप्रेततमो महाराजेनाद्य स्वप्नो दृष्ट इति सकलं राजकुलं प्रीतिविशेषादस्वतन्त्रमिव ।

राजा—नन्वार्यस्तं श्रोतुकामः ?

शाल—यदि देवस्यायासो न स्यात् ।

राजा—तत्सम्प्रधारणार्थमेव नन्विहागता वयम् ।

शाल—अनुगृहीतोऽस्मि ।

राजा—यः खल्वहं यथाविधानं व्रतनियमोपवासैर्देवपूजया दिवसं नीत्वा प्राप्तायां रजन्यां निद्रावशमुपगतवानस्मि ।

शाल—ततस्ततः ।

राजा—ततः—

प्रविलम्बभुजङ्गभोगहारं शशिलेखास्मितवज्जटाकिरीटम् ।
भगवन्तमुपेतमभ्यपश्यं गिरिशं भस्मविलेपनावदातम् ॥

शाल—अहो! दैवसिद्धिः । ततस्ततः ।

राजा—ततस्तद्दर्शनात्समुदीर्णहर्षस्त्वरिततरमुत्थाय प्रणम्य गगनतलमभ्युच्छ्रिताञ्जलिरहमतिष्ठम् ।

शाल—ततस्ततः ।

राजा—ततस्स भगवान् सजलजलदमन्द्रस्तनितगम्भीरेण मनश्श्रुतिह्लादिना स्वरेणैकं श्लोकमुक्त्वान्तर्हितः । अहमपि तेन ध्वनिना प्रबुद्धः ।

शाल—किं देवस्य स्मृतिपथमपि प्राप्तः स श्लोकः?

राजा—श्रूयताम् ।

> यो विक्रान्तः कुलीनो नयविनयपरः सर्वविद्याकलाज्ञो
> दाताव्याधिः कृतास्त्रो व्यसनविमुखधीर्निर्विकारो विपत्सु ।
> मृत्योर्निर्भीश्चिरायुर्मृदुरतिसुभगो दीप्तिमान्प्राज्ञमन्त्री
> कन्या नीताप्यकामं भवति सुखयशोभागिनी तादृशेन ॥

शाल—चन्द्रिकास्थितिरिवेदं संवरणम् ।

राजा—सखे भरतरोहक ! येऽस्माभिस्संबन्धकामाः को नु खलु तेषु सर्वैर्गुणैर्युक्तः ।

भरत—दूषिता इव ते सर्वे भगवता शर्वेण ।[1]

राजा—कथमिव?

भरत—अश्मकराजसूनुः संजयो रुधिरोद्गारी पानप्रसक्तश्च । माधुरो राजा जयवर्मा मूर्खः । काशीपतिर्विष्णुसेनो मृगयाक्षप्रसङ्गी ।

राजा—

> एभिर्गुणैर्विरचितः पुरुषोऽस्त्यवश्यं यूयं गवेषयत बुद्धिविलोचनैस्तम् ।
> तादृग्विधो भुवि न चेत्स्वयमभ्युपेत्य ब्रूयात्स्वयं[2] स भगवान्वृषराजकेतुः ॥

वसु—सदृशमुक्तं प्रज्ञातिशयस्य ।

भरत—मागधो राजा दर्शकः क्रूरः । अङ्गेश्वरो जवरथो विरूपः । मत्स्याधिपतिः शतमन्युर्मत्सरी । सिन्धुराजः सुबाहुर्भीरुः ।

राजा—किं त्वमसि वक्तुकाम इव?

वसु—उपलक्षित इव मया शङ्करानुमतो वरः ।

राजा—कथयतु भवान्, कथयतु ।

वसु—त्रासः पुनर्मां वारयति ।

राजा—मन्त्रो ननु वर्तते ।

वसु—एवं मन्ये ।

---

1. cf. Pr. महासेनं वर्जयित्वा नहीदानीमेते गुणाः क्वचिदेकस्था दृश्यन्ते ।

2. कथम् Supported by Vatsarājaprabandha also

विचित्य वत्सेश्वरकल्पवृक्षादम्लानशोभं गुणरत्नपुष्पम् ।
श्लोकस्रगेषा प्रथितेव यत्नार्द्रीहेमसूत्रेण महेश्वरेण ॥

**शाल**—सम्यगुपलक्षितं वसुवर्मणा ।

**राजा**—यद्यसौ सर्वगुणसम्पन्नस्तथाप्यहं नोत्सहे स्वां दुहितरं तस्मै दातुम्[1] ।

**भरत**—किन्नु खलु कारणम् ?

**राजा**—[2]स हि

कुलबलमतिरूपविक्रमश्रुतिसाचिवात्मविशेषगर्वतः ।
न गणयति नरेश्वरान् क्षितौ[3] मृगपतिपोत इव द्विपेश्वरान् ॥

**भरत**—यद्येवं तमिह बध्वानीय सर्वेषां मद्व्याधीनां चिकित्सा कर्तव्या ।

**राजा**—सखे किं तच्छक्यमिव ?

**भरत**—देवपादानामाज्ञामात्रापेक्षिण्यो ननु सर्वाः कार्यसिद्धयः ।

**शाल**—येन वयं संबन्धार्थिनस्तद्बन्धने को गुणः ?

**भरत**—साक्षात्कृत्य वरस्य गुणागुणयोर्निश्चयः कर्तव्यः न लोकरवतः ।[4]

**शाल**—किं स्वराज्यस्थ एव न शक्यः परीक्षितुम् ।

**भरत**—आपन्नाम—

नयक्षमाधृतिमतिशौर्यविक्रमप्रवीणताश्रुतबलवीर्यसम्पदः ।
स्वबान्धवप्रणयिजनांश्च देहिनां परीक्षितुं निकषशिलेव निर्मिता ॥

**शाल**—यदि तस्य तथा गृह्यमाणस्यानिष्टं किञ्चित्स्यात् ।

**भरत**—तत्र तस्य वरगुणहीनतापरिव्यक्तिः शत्रुवधात्स्वामिनस्तेजोवृद्धिर्दर्शकस्य च पक्षाघातः।

**शाल**—परीक्ष्यमाणस्सर्वगुणैरसमन्वितो भवेत्ततः किम् ?

**भरत**—कीर्तिविशेषो लाभश्च ।

**वसु**—कथं लाभः ?

---

1. cf Pr. दुहितुः प्रदानकाले दुःखशीला हि मातरः। तस्माद्देवी तावदाहूयताम् In this drama, he does not consult the queen at all.

2. cf. भामह 4. 40.

3. cf. Pr. न च मम परितोषो यन्न मां वत्सराजः प्रणमति गुणशाली कुञ्जरज्ञानदृप्तः ॥ and महासेनशब्दमपि न गणयति । किं सम्बन्धमभिलषति and उत्सेकयत्येनं प्रकाशराजर्षिनामधेयो वेदाक्षरसमवायप्रविष्टो भारतो वंशः ।—दर्पयत्येनं दायाद्यागतो गान्धर्वो वेदः विभ्रमयत्येनं वयस्सहजं रूपम् । विस्रंभयत्येनं कथमप्युत्पन्नोऽस्य पौरानुरागः।

4. लोकमुखतः ?

भरत—स खलु गान्धर्वे हस्तिशिक्षायामस्त्रसम्पदि चैकवीर इति लोके गण्यते ।

यथाक्रमेण तत्तस्माच्छिष्यन्ते च नृपात्मजाः ।
दुष्टान् सर्वांश्च विधिवद्दमयिष्यति च द्विपान् ॥

शाल—वत्सराजभयान्ननु पाञ्चालोऽस्माननुवर्तते ?

भरत—अथकिम् ।

शाल—गृहीते तत्र भवति कौशाम्बीं प्रतिपत्स्यते सः । तद्गृद्धिरपि नोपेक्षितव्या ।

भरत—वत्सराजमोक्षभयात् द्विगुणं सर्वप्रदानैरारुणिरनुदिनमस्माकं महारजमाराधयिष्यति । अपि च—

अनिर्जितात्मा स्वविधेयबुद्धिः प्रचण्डदण्डो निकृतिप्रधानः ।
नाशो भवेत्तस्य विभूतिवृद्धया लताभिवृद्धयेव महीरुहस्य ॥

राजा—यदि तस्य परीक्ष्यमाणस्य लोकविख्याता गुणविभूतिरविसंवादिनी स्यात् किमस्माभिः कार्यम् ?

भरत—स नो महेश्वरानुमतो वरः ।

राजा—सञ्जयाय दास्यामीति शुल्कं प्रतिगृह्य तस्मै न दत्तवानिति नन्वस्माकमयशः ?

भरत—यथा वाच्यं दोषं[वाच्यदोषो]न भवति तथोपायं करिष्यामः ।

राजा—कथमिव?

भरत—स्वयमेव नेष्यति ।

राजा—ततोऽपि ननु पापकरम् ।

भरत—तथापि दैवादुपपन्नमिव दृश्यते ।

राजा—कथमिव ?

भरत—यथाप्रतिज्ञादाने त्रयो दोषाः ।

राजा—के ते ?

भरत—शम्भोरभिप्रायव्यतिक्रमः, कोशक्षयः, राजपुत्र्या दुःखभागिता च ।

राजा—कथं कोशक्षयः ?

भरत—शुल्कात् द्विगुणं त्रिगुणं वा ननु तस्मै देयम् ।

राजा—धिगतिकार्पण्यमभिहितम् ।

भरत—देव ! कार्येषु गुरुलाघवं नन्वत्र चिन्त्यते ।

राजा—ततस्ततः ।

भरत—वत्सराजः [जस्य] स्वयं प्रदाने सञ्जये प्रीतिविश्लेषो[षे]ऽपि संवादिता जातिकीर्त्तेश्च [जतिः कीर्तिश्च] ।[1]

राजा—नन्वत्रापि विद्यते कोशक्षयः ।

भरत—आरुणिरस्मत्कटाक्षसाध्यः तस्मात्स्वराज्यप्रदानादेव सत्कृतो भविष्यति ।

शाल—युक्तमभिहितं भवता ।

भरत—प्रसह्य हरणे केवलं प्रमादिताख्यातिः किमेतत्स्वयंभरम् [स्वयंप्रदानाद्वरम्] । सदोषेषु कार्येषु यदल्पदोषं तत्प्रारब्धव्यम् ।[2]

वसु—स्वामिन्! तत्राप्यहं वाच्यदोषं न पश्यामि । कुतः–

नीता बलात्प्रकृतिभद्रतरा सुभद्रा यद्वासुभद्रभगिनी कपिकेतनेन ।
देवस्य तेन समभूद्वचनीयता किं तेजःप्रकाशयशसां यदुदन्तिनां वा ॥

शाल—साधु निरुक्तमभिहितं वसुवर्मणा ।

भरत—देवस्यापि स एव विधिरिष्ट इव दृश्येत ।

राजा—कथमिव ?

भरत—तद्विधिप्रधानो हि श्लोकार्थः ।[3]

राजा—स्यादेतत् ।

शाल—भो ! अस्ति पुनरुपायो वत्सराजं गृहीतुम् ?[4]

भर—आर्य विद्यते ।

शाल—कः खलु ?

भर—स किल—

बाल्ये गजोऽस्मीति नरेन्द्रमार्गे क्रीडन्वयस्यैः सह हर्षमत्तैः ।
अङ्गारकं नाम मुनिं प्रयान्तं मुहुर्मुहुः पांसुभिरभ्यषिञ्चत् ॥[5]

1 The passage is not at all clear. The text is very much mutilated. It may be वत्सराजस्य संप्रदाने संजयप्रीतिविश्लेषेऽपि......

2. This may well be broken up as राजा—प्रसह्य हरणे केवलं प्रमादिताख्यातिः । किमेतत्स्वयं प्रदानाद्वरम् । भर—सदोषेषु कार्येषु यदल्पदोषं तत्प्रारब्धव्यम् ।

3. cf. कन्या नीताप्यकामम् ।

4. This is not a motive for capturing Udayana in Pr.

5. This is in conflict with Bṛhatkathāślokasaṅgraha and Bṛhatkathāmañjari, according to which Udayana was brought up in a hermitage.

शाल—ततस्ततः ।

भरत—ततस्तेन महर्षिणा समुपजातामर्षेण हस्तिहेतोरेव बन्धनं शत्रुवशतां च यास्यतीति स तु शप्तः ।

राजा—अहो ! नृशंसता महर्षेः ।

शाल—कथं त्वयैतदुपलब्धम् ?

भरत—अदूरस्थेनाऽस्मदीयेन चारेणैव तच्छ्रुतम् ।

राजा—यद्येवं गृहीत एव वत्सराजः ।

शाल—भोः! कथमिदानीं प्रारब्धव्यम् ?

भरत—स खल्विदानीं हस्तिबन्धनप्रियः । अतः—

आकृष्य द्विरदेन शिक्षितवता वन्यद्विपानां परां
लीलां कृत्रिमवर्णलक्षणवता मन्देन भद्रश्रिया ।
शूरैः कक्षगतैरतीव बहुभिः स्निग्धायुधीयैर्बलै-
रशक्यश्शक्र इवर्षिशापविवशो युद्धे ग्रहीतुं बलात् ॥

वसु—अहो ! सुनिपुणो ग्रहणोपायः ।

शाल—मन्दहस्तिनियमः किम् ?

भरत—कदाचित्कार्यविसंवादे परस्य वृद्धिर्मा भूदिति ।

राजा—किमस्ति पुनस्तद्योगानुरूपो हस्ती ?

भरत—देव! अस्यैव कार्यस्य हेतोर्गूढं सुपरिकल्पिताश्चत्वारो हस्तिनः ।

राजा—को नु खलु तत्र यास्यति ?

भरत—आर्यशालङ्कायनः ।

राजा—किं तच्छक्यमिव ?

शाल—अवन्ध्यफला हि देवस्याभिप्रायाः ।

राज—कदा नु खल्वार्येण तत्र गन्तव्यम् ?

भरत—यदा स राजा हस्तिवनं प्रविष्टवान् ।

राजा—कथं पुनस्तज्ज्ञास्यामः ?

भरत—न्यस्ता मया सर्वत्र हस्तिवनेषु वनचरपुलिन्दतापसाङ्गारिकादिव्यञ्जनाश्चाराः । कौशाम्ब्यां च तत्रा[द]नुरूपत[रूपा]स्तेभ्यो यथावृत्त[त्तं]कालहीनं मया उपलभ्यते ।

राजा—सखे! किं त्वया पूर्वमेव व्यवसितं वत्सराजग्रहणम् ?

भरत—न हि ।

राजा—कथं पुनरेतत्सर्वं सुविनिहितम् ?

भरत—सर्वेषां आज्ञा[राज्ञां]छिद्रमुपलभ्य छिद्रानुरूपो विधिः प्रागेव मया क्रियते, स्वामिनः पश्चादाज्ञासमकालमेवाभिप्रायसिद्धये ।

राजा—सदृशमेव[ वै ]तदाबाल[ल्य]वृद्धस्नेहपुरस्सरस्य प्रज्ञातिशयस्य ।

(प्रविश्य)

पतीहारी—[१]जेदु भट्टा । कालो दाणिं अत्थाणीए । (?)

भरत—देव! परिसमाप्तो ननु मन्त्रः ?[1]

राजा—तथास्तु ।

(सर्वे उत्थाय परिक्रामन्ति)

राजा—भोः

मम तावदिदं दुःखं नित्यं दुहितृहेतुतः ।
बह्वयो दुहितरो येषां कुर्वते किन्नु नाम ते ॥

(निष्क्रान्ताः सर्वे)

## इति प्रथमोऽङ्कः

---

१. जयतु भर्ता । काल इदानीं स्नानाय (?) उत्थानाय (?)

1 The corresponding portion in the Pratijñāyaugandharāyaṇa is known as मन्त्रालोचनाङ्क ।

## ॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति तापसव्यञ्जनश्चारः)

**चारः**—[१]जदा वेणुवणं पविट्ठो वच्छराओ तदेव मए पेसिदो कवोदको । किं संपत्तो बु[खु]सो उज्जयिणीम् । (परिक्रम्य) किं णु हु सुक्कपण्णमम्मरसद्दो विअ । (विलोक्य) अए! आउहीओ ।

(प्रविश्य)

**भटः**—[२]भअवं! पाणीअं व, भअवं! पाणीअं व ।

**चारः**—[३]भद्द ! करअत्थं विणा णत्थि अण्णम् ।

**भटः** —[४]तं एव्व परमपवित्तम् ।

**चारः**— [५]तह होदु ।

**भटः**—(अञ्जलिना पानीयं पीत्वा) [६]अज्ज जीवाविदह्मि भअवदा ।

**चारः**—[७]भद्द ! अदिसीअला इअं वेला । किं णु हु तुए अदिमत्तं पाणीअं पीदम् ?

**भटः**—[८]भअवं ! भट्टा वच्छराओ सिलिन्द्धअसण्डे णाअवणे रण्णवारिप्पविट्ठं महंतं हत्थिजूहं उवलंभिअ अदीव तुरिदं आआदो ।

१. यदा वेणुवनं प्रविष्टो वत्सराजस्तदेव मया प्रेषितः कपोतकः । किं सम्प्राप्तः खलु स उज्जयिनीम् । किन्नु खलु शुष्कपर्णमर्मरशब्द इव । अये ! आयुधीयः ।

२. भगवन् ! पानीयं वा, भगवन् ! पानीयं वा ।

३. भद्र ! करकस्थं विना नास्त्यन्यत् ।

४. तदेव परमपवित्रम् ।

५. तथा भवतु ।

६. अद्य जीवितोऽस्मि भगवता ।

७. भद्र ! अतिशीतलेयं वेला । किन्नु खलु त्वयातिमात्रं पानीयं पीतम् ।

८. भगवन् ! भर्ता वत्सराजः शिलीध्रकषण्डे नागवने अरण्यवारिप्रविष्टं महान्तं हस्तियूथमुपलभ्यातीव त्वरितमायातः ।

**चारः**—(आत्मगतम्)[१]एव्वं एदम् । पुच्छिस्सं दाव णम् । (प्रकाशम्) भो! किण्णिमित्तं स राआ अप्पेण बलेण परिब्भमदि?

**भटः**—[२]किं अप्पबलम्? दुवे सहस्सा वदाभि (पदादओ)?; दी सद मत्ता तुरआ; विसंदि[विंसदि] मत्तवारणा ।

**चारः**—[३]किं जोअंधराअणो मोण्डो[रुमण्णो] अ अग्गदो गदो, आदु पिट्ठदो आअच्छदि?

**भटः**—[४]अय्यजोअंधराअणो पुण रक्खाए णिउत्तो; अय्यो उण रुमण्णो खुलिन्दखोहं उवसमीदुं पड्ढवणं (?) पविट्ठो ।

**चारः**—(आत्मगतम्) [५]भो! जस्स लहेण [जह लेहण] उत्तं तह एव्व सव्वं ।

**भटः**—[६]भअवं! वंदामि । गच्छामि[गच्छम्मि]अहम् ।

**चारः**—[७]सोत्थि ।

(निष्क्रान्तो भटः)

**चारः**—[८]किं णु हु दाणीं कत्तव्वं । पविट्ठो वच्छराओ सिलिद्धअसण्डं णाअवणम् । कोवि[व्वि] उज्जइणीओ आअच्छदि । (एकतो विलोक्य) दिट्ठिआ एसो कवोदओ इदो एव्व आअच्छदि ।

(प्रविश्य)

**पुलिन्दवेषश्चारः**—[९]भो! सुट्ठु खु एदं पुच्छदि । णिक्कम्मसीळाणं तपो त्ति एत्थ तुवं चिट्ठसि । अहं पुण तदुवाअणाली विअ दोतपो [आदवे] परिब्भमामि ।

१. एवमेतत् । पृच्छामि तावदेनम् । भोः! किन्निमित्तं स राजाऽल्पेन बलेन परिभ्रमति ।

२. किमल्पबलम्? द्वे सहस्रे पदातयः द्विशतं मत्तास्तुरगाः विंशतिमत्तवारणाः ।

३. किं यौगन्धरायणो रुमण्वांश्चाग्रतो गतौ, उत पृष्ठत आगच्छतः?

४. आर्ययौगन्धरायणः पुना रक्षायै नियुक्तः । आर्यः पुना रुमण्वान्पुलिन्दक्षोभमुपशमयितुं प्रस्थवनं (?) प्रविष्टः ।

५. भो यथा लेखेनोक्तं तथैव सर्वम् ।

६. भगवन्! वन्दे । गच्छाम्यहम् ।

७. स्वस्ति ।

८. किन्नु खल्विदानीं कर्तव्यम् । प्रविष्टो वत्सराजः शिलीध्रकषण्डं नागवनम् । कोऽप्युज्जयिनीत आगच्छति । दिष्ट्यैष कपोतक इत एवागच्छति ।

९. भो! सुष्ठु खल्विदं पृच्छामि । निष्कर्मशीलानां तप इत्यत्र त्वं तिष्ठसि । अहं पुनस्तन्तुवायनालीवातपे परिभ्रमामि ।

प्रथमः— [1]भो! मच्चंधिअ! किं तुवं णअरं आअच्छ (?) एव्व णिवुत्तो, ण खु वा ।

द्वितीयः—[2]भो ! मए गच्छंतेण मग्ग एव्व अय्यो साळंकाअणो दिट्ठो ।

प्रथमः—[3]कहं तेण विण्णादं वच्छराओ सिलिद्धअसण्डं पविट्ठो त्ति ?

द्वितीयः—[4]णअरत्थेहिं चारेहिम् ।

प्रथमः—[5]जुज्जइ । तदो तदो । सो दाणीं कहिं ?

द्वितीयः—[6]अय्यो साळंकाअणो तहिं तहिं [1]चौरग्गछं जहाणुरूवं ठाविअ चउस्सदेहि पदादीहि सबरराअं [अ]णिद्दिसिअमाणमग्गो णीळहत्थि[त्थिम्] गह्णिअ जमुणाकओच्छ साळवणं पविसिअ णिऊढं उपविट्ठो ।

प्रथमः—[7]तदो तदो ।

द्वितीयः—[8]तदो अहं अय्येण साळंकाअणेण सेणस्स समीवं गच्छिअ वच्छराअप्पवुत्तिं जाणीहि त्ति पेसिदो ह्मि ।

प्रथमः—[9]अजुत्तं किदं तेण सेणस्स समीवं कवोदअं विसज्जंतेण ।

द्वितीयः—[10]अलं परिहासेण । को दाणिं वुत्तन्तो ?

१. भो ! मत्सन्धीय ! किं त्वं नगरमगत्यैव निवृत्तः, न खलु वा ।
२. भो ! मया गच्छता मार्ग एवार्यः शालङ्कायनो दृष्टः ।
३. कथं तेन विज्ञातं वत्सराजः शिलीध्रकषण्डं प्रविष्ट इति ?
४. नगरस्थैश्चारैः ।
५. युज्यते । ततस्ततः । स इदानीं कुत्र ?
६. आर्यशालङ्कायनस्तत्र तत्र चौरगजं (?) यथानुरूपं स्थापयित्वा चतुश्शतैः पदातिभिः शबरराजनिर्दिश्यमानमार्गो नीलहस्तिनं गृहीत्वा यमुनाकच्छे सालवनं प्रविश्य निगूढमुपविष्टः ।
७. ततस्ततः ।
८. ततोऽहमार्येण शालङ्कायनेन श्येनस्य समीपं गत्वा वत्सराजप्रवृत्तिं जानीहीति प्रेषितोऽस्मि ।
९. अयुक्तं कृतं तेन श्येनस्य समीपं कपोतकं विसर्जयता ।
१०. अलं परिहासेन । क इदानीं वृत्तान्तः ?

1. चौरग्गयं चउस्संदेहिं पदादिहिं ।

प्रथमः—[1]विदिदम् मए एव्व सव्वम् । आअच्छ दाणिम् । तहिं गए एव्व गच्छामो ।

द्वितीयः—[2]तह ।

(निष्क्रान्तौ)

प्रवेशकः

(ततः प्रविशति राजा, विष्णुत्रातः, विदूषकश्च)

राजा—सखे ! विष्णुत्रात !

तरुभिरिभकराग्रभग्नशाखैः करिदशनोल्लिखितैर्महाद्रिकुञ्जैः ।
द्विपपदविषमैश्च भूमिभागैर्गजमयवत्प्रतिदृश्यते वनं मे ॥

विदू—[3]मम उण बुभुक्खाए ओदणमअं विअ पडिभादि ।

विष्णु—नैतदाश्चर्यम् ।

राजा—वयस्य ! किमिदानीमेव प्रारब्धा बुभुक्षा ?

विदू—[4]कुक्कुडेहिं सह पबुद्धा ।

(सर्वे परिक्रामन्ति)

विष्णु—देव ! इतो विलोक्यताम् । उच्चत्वादस्य प्रदेशस्य विस्पष्टं दृश्यते वारी । एषा हि

संभ्रम्यमाणकलभेभकरेणुपोतधेनूर्मिभङ्गकलिला रदभे[फे]नमाला ।
वारी विभाति विलसत्करभोगिसङ्घा व्यालोलफेनभुजगोर्मिमतीव वापी ॥

राजा—सम्यगाह भवान् ।

उपलनिचयनीलं धीरगम्भीरघोषं दशनशबलमेतद्भ्राजते हस्तियूथम् ।
विरलतरबलाकं तोयभारावनम्रं नवमिव घनवृन्दं मन्दमन्द्रप्रणादम् ॥

विदू—[5]भो ! मूळकन्दा विअ दन्ता, मोदआ विअ कुम्भा, मंणआ विअ कण्णा, गुळित्ता(?) विअ णअणा, ओदणरासी विअ णाआ ।

१. विदितं मयैव सर्वम् । आगच्छेदानीम् । तत्रैव गच्छावः ।
२. तथा ।
३. मम पुनर्बुभुक्षया ओदनमयमिव प्रतिभाति ।
४. कुक्कुटैस्सह प्रबुद्धा ।
५. भो मूलकन्दा इव दन्ताः, मोदका इव कुम्भाः, मण्डका इव कर्णाः, कुलित्था इव नयनानि, ओदनराशिरिव नासा ।

राजा—अतिसादृश्यमभिहितम् ।

(प्रविश्य)

पाशिकाध्यक्षः—[1]जेदु भट्टा! किदं सव्वासु दिसासु जहाणत्तं बलिविहाणं । हुदो अग्गी । वाइदा सोत्थी ळत्थदक्खिणोहिं बह्मणेहिम् । परिवुदा वारी । उत्थाविदा पदाआ । तुज्झस्स घसमालळे (?) दुवारसमीवे ठिदा पुरिसा उत्थिद (?) वेणुदंडपासाणंकुसपासा- उह(?)समत्थेहिं सह गएहि ओदिण्णो । पडि पादस्स(?)चम्मकञ्चुआसाहावच्छादिदस- रीरदकरेणुवादंतरिदा (?) पादवंधीआ । पेक्खदु पेक्खदु भट्टा एदाणं कम्मविहाणम् ।

राजा—गच्छतु भगवान् । यावदहमप्यागच्छामि ।

पाशि— भट्ट तह । (इति निष्क्रान्तः )

(प्रविश्य)

वनचरवेषश्चारः– अज्ज खु जूहपदिं विअ सुसिक्खिदा करेणू वञ्चिअ [1]वच्चराअबन्धणं पवेसिअ भट्टिणो पज्जोजदस्स[2] अणिरिणो भविस्सम् । (परिक्रम्य) पविट्ठो ह्नि सिलिद्ध्अ सण्डम् । कहिं णु हु वच्छराओ । (विलोक्य) एसो सो । (उपसृत्य) जेदु भट्टा । ण हन्त वञ्चिदो । णीलो गजो मए दिट्ठो ।[3]

राजा—(सानन्दम्) भद्र ! नीलो गजः क्व त्वया दृष्टः ?

चारः—[4]इदो जोअणमत्ते जमुणाकच्छे सालवणम् ।[1] तहिं माणलभरिआ णाम अदि- मुत्तअलआ ति[5] से समीवे सो अहिरमदि ।

१. जयतु भर्ता । कृतं सर्वासु दिशासु यथाज्ञप्तं बलिविधानम । हुतोऽग्निः । वाचितं स्वस्ति लब्धदक्षिणैर्ब्राह्मणैः । परिवृता वारी । उत्थापिताः पताकाः । तव गहनालये (?) द्वारसमीपे स्थिताः पुरुषा उद्धृतवेणुदण्डपाषाणाङ्कुशपाशायुधसमर्थैः सह । गजैः अवतीर्णे पथि पातस्य (?) चर्मकञ्चुकाच्छादितशरीरकरेणुपादान्तरिताः (?) पादबन्धनीयाः (?) । प्रेक्षतां, प्रेक्षतां, भर्तेदानीं कर्मविधानम् ।

२. भर्तस्तथा ।

३. अद्य खलु यूथपतिमिव सुशिक्षिता करेणुर्वञ्चयित्वा वत्सराजं बन्धनं प्रवेश्य भर्तुः प्रद्योतस्यानृणो भविष्यामि । प्रविष्टोऽस्मि शिलीध्रकषण्डम् । कुत्र नु खलु वत्सराजः । एष सः । जयतु भर्ता । न हन्त वञ्चितः । नीलो गजो मया दृष्टः ।

४. इतो योजनमात्रे यमुनाकच्छे सालवनम् । तत्र मानलभरिता नाम अतिमुक्तकलता अस्ति । अस्याः समीपे स अभिरमते ।

1. वच्चराअं?
2. पज्योदस्स ।
3. cf. Pr. एकनीलो हस्ती मया दृश्यते P. 9
4. cf. Pr. ...इतः क्रोशमात्रे मल्लिकासालप्रच्छादितशरीरः P. 9.
5. अत्थि ।

राजा—सखे! विष्णुत्रात! नीलकुवलयतनुर्नाम[1] चक्रवर्तिनो हस्ती । न शक्यः सोऽन्यैर्गृहीतुम् । अहं तु पुनः

शक्तो ग्रहीतुं द्विरदप्रवीरं तं वीणया केवलयाश्रमेण ।
विशेषतः कृत्यकरी ममैषा विद्या गजेन्द्रेषु तथाविधेषु ॥

विष्णु—ऐरावतादीनपि दिग्गजान् देवो ग्रहीतुं समर्थः । किं पुनस्तं वनगजम् ![2]

राजा—सखे ![3] त्वमिदानीं सर्वैस्साधनैर्हस्तिबन्धने प्रयतस्व । अहं पुनस्तं द्विरदवरं स्वीकृत्य शीघ्रमानयिष्ये ।

विष्णु—

सापायाः प्रत्यन्ता न च साधु परीक्षिता नदीकक्ष्या ।
तस्माद्बलैस्समस्तैर्गन्तव्यं नान्यथा तत्र ॥[4]

विदू—[१]सुट्ठु तत्तहोदा उत्तम् । अपरिच्छिदो णाम देसो अपरिच्छिदओदणं विअ दुःक्खमुप्पादेदि ।

राजा—वयस्य! तद्दर्शनमनियतम् । नियतप्राप्तस्य महतो हस्तियूथस्य त्यागादर्थहानिर्भवेत् । किमत्र विचारेण । पश्य

दृष्टो[5][ष्टा]भवेद्यदि स घोषवती ममैषा संविद्यते गजवरग्रहणैकहेतुः ।
स्यादत्ययस्तमपि साधयितुं समर्था व्यालोदरासिततलास्ति ममासियष्टिः ॥

विष्णु—हस्तिबन्धनं कृत्वैव ननु गन्तव्यम् ।

राजा—न युक्तः सातिशये वस्तुनि कालातिक्रमः । सामसाध्यत्वाद्गजपतेः कोपकारणञ्च महाबलदर्शनम् ।

१. सुष्ठु तत्रभवता उक्तम् । अपरीक्षितो नाम देशः अपरीक्षित ओदन इव दुःखमुत्पादयति ।

1. Once mentioned as कुवलयनीलतनु and again as नीलकुवलयतनु । cf. Pr. भट्टिण उत्त-अत्थि एसो चक्कवत्ती हत्थी णीलकुवलयतणू णाम हत्थिसिक्खाए पठिदो P. 9.

2. cf. Pr. भट्टा अमच्चेण विण्णाविदो—ण हु दे एलावणादीणं वि दिसागआणं गहणं ण सम्भणीअम P. ७.

3. cf. Pr. ता अप्पमत्ता होह तुज्झे इमसिंस जूहे । गअं तं अहं वीणादुदीओ आणेमि ।

4. cf. Pr. अविदु दुरारक्खदाए आसण्णदोसाणि विसअन्तराणि । ......ता पदादिमत्ताहि ठिदं इमं जूहं कारिअ सव्व एव्व गच्छामो ण एकाइणा सामिणा गन्तव्वम् ।

5. The reading in the Vīṇāvāsavadatta is दृष्टो but the Vatsarājaprabandha gives दृष्टा ।

**विदू**—[1]भो किं पुण कादव्वम् ?

**राजा**—सखे, विष्णुत्रात! अहमेनं गृहीत्वा सायं सप्तपर्णवेदिकाद्वारे वासार्थमागमिष्यामि। त्वं तु पुनः—

क्षीणव्याधितवृद्धनिन्दितगजान् दन्ताधिकान् धेनुकान्
बालान् गर्भवतीर्विलक्षणतमाञ्श्वेतादिवर्णाधिकान्।
प्राप्तैश्वर्यसुखांश्च वारणवरांस्त्यक्त्वा प्रशस्तान् गजान्
बद्ध्वाथ व्रज साधनैः परिवृतस्तत्रैव वस्तुं सखे॥

**विष्णु**—यदाज्ञापयति देवः।

**चारः**—[2]भट्ट! काळादिक्कमेण अळिअवादी विअ भट्टिणो समीवे भविस्सम्।

**राजा**—भद्र! बहुशो दृष्टप्रत्ययं ननु ते वचः!

**चारः**—[3]अदो एव्व मए भणीयदि।

**राजा**—सुन्दरपाटलस्तावत्।

**अश्वबन्धकः**—(प्रविश्य) [4]भट्ट! एसो सुन्दरपाटलो।

**राजा**—आनय(इत्यश्वमारुह्य) विष्णुत्रात! गच्छ त्वम्। कात्यायनमिश्रानग्रतः कुरु।

**विष्णु**—यदाज्ञापयति देवः। कष्टं भोः!

नृपाः प्रभुत्वात्प्रतिषेधवामा
जिह्मो विधिस्तद्वशवर्ति कार्यम्।
साचिव्यतो नापरमस्ति पुंसां
विषाददुःखायशसां निदानम्॥ (निष्क्रान्तः)

1. भोः! किं पुनः कर्तव्यम्?
2. भर्तः! कालातिक्रमेण अलीकवादीव भर्तुः समीपे भविष्यामि।
3. अतः खलु मया भण्यते।
4. भर्तः! एष सुन्दरपाटलः।

3

चारः—[1]"जइ वच्छराओससाहणो आअच्छदि तदा तुवं पळाइअ आअच्छ" इति अय्य साळंकायणेण उत्तम् । एसो दाणिं बलम् उज्झिअ णिग्गदो ; सव्वदा सिद्धं कज्जम् ।

राजा—घोषवती तावत् ।

औपागायकः—(प्रविश्य घोषवतीहस्तः)[2]जेदु भट्टा ! एसो ह्मि ।

राजा—त्वं मदनुपदमागच्छ ।

औपगा—[3]भट्ट ! तह ।

विदू—[4]भो ! एसो कच्चायणो विंसदिमत्तेण बळेण परिवुदो अग्गदो गदो । अहं दाणिं तुए एव्व सह गमिस्सम् ।

राजा—वयस्य ! शीघ्रमस्माभिर्गन्तव्यम् । अतस्त्वं विष्णुत्रातेन सह गच्छ ।

विदू—[5]भो ! तुए एव्व अहं आअच्छामि ।

राजा—वयस्य ! तिष्ठ त्वम् । मम खलु प्राणैः शापितः ।

विदू—[6]एसो ह्मि । गच्छ तुवं विअआअ ।

(निष्क्रान्तः)

चारः—[7]भट्ट ! ण दाणिं चिराइदव्वम् ।

राजा—भद्र ! त्वमग्रतो भूत्वा मार्गमादेशय ।

चारः—[8]तह । इदो इदो ।

1. "यदि वत्सराजः ससाधन आगच्छति तदा त्वं पलाय्य आगच्छ" इति आर्यशालङ्कायनेन उक्तम् । एष इदानीं बलमुज्झित्वा निर्गतः ; सर्वदा सिद्धं कार्यम् ।
2. जयतु भर्ता ! एषोऽस्मि ।
3. भर्तः ! तथा ।
4. भोः ! एष कात्यायनो विंशतिमात्रेण बलेन परिवृतो अग्रतो गतः । अहमिदानीं त्वयैव सह गमिष्यामि ।
5. भोः ! त्वयैवाहमागच्छामि ।
6. एषोऽस्मि । गच्छ त्वं विजयाय ।
7. भर्तः ! नेदानीं चिरायितव्यम् ।
8. तथा । इत इतः ।

(सर्वे परिक्रामन्ति)

राजा—अहो सुन्दरपाटलस्य जवविशेषः । इह हि—

तरुगहनमिदं नदीप्रवाहे पतितमिवोभयपार्श्वयोर्विरूढम् ।
अभिमुखमभिधावतीव वेगात्प्रमुखगतं समवेक्ष्य दूरतो माम् ॥

चारः—[1]पविसह्म जमुणाकच्छं । अज्ज ! दिट्ठिया चउ(त्थ)ब्भाअवशिट्ठे दिअसे संपत्तह्म (परिक्रम्य) भट्ट ! एसो खु सो वारणो अदिमुत्तअसाळच्छाआए ठिदो ।

राजा—सखे ! अयमत्र । एष हि—

समसितनखरान्तः कार्मुकाकारवंशः
सुहनुकटललाटो दीर्घपुच्छो दृढांसः ।
पृथुतरमुखकर्णो व्यायतावृत्तहस्तो
जलभरगुरुमेघश्यामपूर्वोच्छ्रिताङ्गः ॥

चारः—[2](आत्मगतं) दाणिं फुंळामि विअ । (प्रकाशम्) मुहुत्तअं तिन्दुअच्छाआए विस्समिस्सम् ।

(निष्क्रान्तः)

राजा—(अश्वादवरुह्य) भृङ्गारकस्तावत् ।

चेटः— (प्रविश्य भृङ्गारकहस्तः) [3]जेदु भट्टा ! एसो आणीदो ।

राजा—(आचम्य) औपगायक ! घोषवतीमानय ।

औपगा—[4]भट्ट ! एसा घोसवदी ।

राजा—(प्रगृह्य वीणां मूर्च्छयति)

1. प्रविशामो यमुनाकच्छम् । आर्य ! दिष्ट्या चतुर्थभागावशिष्टे दिवसे सम्प्राप्ताः स्मः । भर्तः ! एष खलु स वारणः अतिमुक्तकसालच्छायायां स्थितः ।
2. इदानीं फुल्लामीव । मुहूर्तं तिन्दुकच्छायायां विश्रमिष्ये ।
3. जयतु भर्ता ! एष आनीतः ।
4. भर्तः ! एषा घोषवती ।

चेटः—[1]अहं दाणिं तहिं एव्व उवविसिस्सम् ।

(निष्क्रान्तः)

राजा—(आत्मगतम्) किं नु खलु क्षीणो मे बाहुः ? वेपते मे सव्यं चक्षुः ।

औपगा—[2]हद्धि ! पडिपुप्फं (पडिमुहं ?) कण्णअरुत्ते (रुन्तुअं?) वाअसो कूजइ । बहुचोराणं आवासं खु इदं वणगहणम्; किं णु हु भवे !

(ततः प्रविशति चोरसेनापतिः खड्गहस्तश्चेटश्च)

चोरः—अहो नु खलु राज्ञां प्रभावो नाम ! वत्सराजो वनमिदं प्रविष्टवानिति श्रुतमात्रेणैव भिन्नो नः सङ्घातः ।

(उभौ परिक्रामतः)

राजा—(वीणां वादयन् गायति)

निरुपमबलवीर्यशौर्यतेजः कुवलयनीलतनो मनोज्ञवंश ।
शृणु वचनमनेकपप्रबर्ह व्रज वशतां मम भद्र भद्रमस्तु ॥

(नेपथ्ये भेरीपटहशङ्खाकृष्टः शब्दः क्रियते)

राजा—हन्त ! वञ्चिताः स्मः नीलकुवलयतनुरप्रतिनिधिरयं हस्तीति । केनाप्यसौ मदाकर्षणार्थं नियुक्तः प्रणिधिः ।

औपगा—[3]सव्वदो परिवुदह्म । साउहेहिं मणुस्सेहिं ।

राजा—(औपगायकाय वीणां दत्वा, अश्वमारुह्य) असौ खलु प्रदेशस्तुरगसञ्चरणायोग्य इव दृश्यते । तदागम्यताम् ।

(सर्वे परिक्रामन्ति)

राजा—भोः !

तिष्ठ प्राग्जयधन्व नागरक हे कात्यायनोपेहि मां
पृष्ठं चुन्द भजस्व सव्यमरिमन्नृक्षापसव्यं मम ।

1. अहमिदानीं तत्रैवोपविशामि ।

2. हा धिक् ! पडिपुप्फं (प्रतिमुखं) कर्णारुन्तुदं वायसः कूजति । बहुचोराणामावासः खलु इदं वनगहनम् । किन्नु खलु भवेत् !

3. सर्वतः परिवृताः स्मः सायुधैर्मनुष्यैः ।

मा गा हंसक दूरमुग्र भव मत्पार्श्वेऽवतिष्ठाग्निजि-
    द्वेहि व्याघ्र हयः (यं?) शिवेन सहिताः शेषा भवन्त्वग्रतः ॥

अश्व— [1]साहु जहाणत्तं सव्वे ठिदा ।

(प्रविश्य)

शालङ्कायनः—देव! मा साहसं कार्षीः । परीतोऽसि महता हयगजकलि-लेन प्रद्योतबलेन ।

राजा—आः! तस्यैव दुरात्मनः प्रयोगः खल्वसौ ।

भवतु पुनरितः प्रभृत्यहं तत्कुलमिह हन्मि समस्तमाकुमारम् ।
वनमिव सुसमृद्धमातृणेभ्यस्तरुपरिघट्टनजो हिरण्यरेताः ॥

शाल—कुशलिनमक्षतं त्वां द्रष्टुमिच्छति महासेनः ।

राजा—(आत्मगतम्) यथाक्रममारब्धाः क्रिया विद्वद्भिरनपहास्याः सफलाश्च भवन्ति । अतः सामादिनयैरिमामापदमुत्तरेयम् । (प्रकाशम्) कस्त्वम् ? किं ते गोत्रम् ?

शाल—देव ! सूर्यदत्तो नाम्ना शालङ्कायनो गोत्रेण ।

राजा—सुप्रभातमद्य यच्चिराभिलषितो भवतो दर्शनोत्सवः समासादितः । एष खल्वर्थानुबन्धोऽर्थो नाम । साधु, इहागम्यताम् ।

शाल—अग्नय इव नात्यासन्नेन नातिदूरस्थितवता ननु सुखसेव्या राजानः ।

औपगा— [2]पदीआळीव (पदिआईव्व ?) धुत्तो बह्मणो ।

राजा—आगच्छेदानीं गच्छामः । कुरुष्व तावत्त्वद्भ्रूक्षेपानुवर्तिनीं वत्सेश्वरलक्ष्मीम् । कुतः—

विन्यस्य सम्यङ्निजराज्यभारं प्रज्ञाश्रुतिश्रीमति सूर्यदत्ते ।
स्वप्स्याम्यहं स्वस्थमनाः कदेति या प्रार्थना साद्य मम प्रसिद्धा ॥

शाल—प्रतिगृहीतो देवस्य प्रसादः । किन्तु स्वामिनो यथोद्दिष्टकारिता ननु परत्रेह च हितसुखयोर्निदानम् ।

1. साधु, यथाज्ञप्तं सर्वे स्थिताः ।
2. प्रतिवादीव धूर्तो ब्राह्मणः ।

राजा—भो सूर्यदत्त ! तत्रभवान् भरतरोहकस्त्वद्गुणविभूतिमसहमानश्चण्डाल इव वराहकलहे द्वयोरेकतरवधेनात्मनो वृत्तिमपेक्षमाणस्त्वां नित्यं जिघांसुरीदृशेष्वासन्नापायेषु नियुनक्ति, लकुटस्थानीयस्त्वं तस्य संवृत्तः ।

शाल—महासेनस्याहं भृत्यो न भरतरोहकस्य ।

राजा—आर्य ! प्रद्योतस्यातिक्रूरस्य समीपचारिणो व्याघ्रसमीपचारिणो मृगस्येव नियतस्तव प्रत्यवायः । ततस्तत्र स्थानं न श्रेयस्करं भवतः । अपि च, परीक्ष्यतां तावद्भवता ।

जालेन वह्निवदवार्यतरस्त्वयाहं
प्रद्योतनो (तो) ध्रुवमतस्तव मृत्युरेव ।
पौरोग्रहस्तिपकनापितसूदमुख्यान्
योऽहन् कृतागसमसौ न हिनस्ति किं त्वाम् ॥

शाल—(कर्णौ पिधाय) शान्तं शान्तं पापम् । नाहं भर्तुरपवादं श्रोतुं समर्थः । अस्थाने पुनर्देवेन वाग्व्ययः क्रियते । कुतः—

अभेद्यया स्वाम्यनुरागरक्षया सदा कृतस्वस्त्ययनं मनो मम ।
अतः परेषां परुषाक्षरायुधैर्न भिद्यते भेदवचोमहाग्रहैः ॥

अपि च

प्रद्योतं भज मुक्त्वास्त्रं श्रेयः स्यात्ते महत्ततः ।
देशकालौ हि विद्येते क्षमायास्तेजसोऽपि च ॥

राजा—हा धिक् !

कः क्षत्रियः सहजमानमयामृतस्य
श्रीमद्यशःसमुपदंशवतो रसज्ञः ।
शस्त्रं विहाय वशतां द्विषतामुपेया-
द्यायामकर्कशदृढायतपीनबाहुः ॥

अश्व—[1] भट्ट ! आरूढो एसो हत्थिणं । सज्जो होहि ।

1. भर्तः ! आरूढ एष हस्तिनम् । सज्जो भव ।

औप—[1]हत्थिवक्को सखग्गभीसणं उत्तिविआमाणसजिरीरणिअरंपपुच्छसीहणादं (?) वणगच्छदोणिग्गदं सत्तुबलं परिक्खिदं च अह्माणं जोहेहि ।

राजा—भवतु भवतु ।

अहमरिपृतनानामद्य साश्वद्विपानां
धरणितलमसृग्भिस्तर्पयिष्यामि कोष्णैः ।
वृकशुनकशृगालान् काककङ्कांश्च मांसै-
र्दयिततरयुगान्तं प्राणदानैः कृतान्तम् ॥

(निष्क्रान्तः सार्धमौपगायकाश्वबन्धकाभ्याम्)

शाल—अहो, क्षात्रं तेजः ! अहमप्यात्मनो बलस्यो(पान्ते)भविष्यामि ।

(निष्क्रान्तः)

चेटः—[2]अय्य ! भीददाए सुट्ठु अहं वाउळो को एसो देसो ?

चोरः—अरे ! नन्वयं यमुनाकच्छः ।

चेटः—[3]अय्य ! इदाणिं खु मए अभिण्णादम् ।

(उभौ परिक्रामतः)

चोरः—(आकर्ण्य) अये ! अरण्ये महदाक्रुष्टम् । श्रुतं मया ह्यद्य शालंकायनः प्रविष्टवानिति । न खलु किंचिद्वत्सराजस्तेन छलितः स्यात् ।

चेटः— (परिक्रम्य अवलोक्य सभयम्)[4] अय्य ! इदो इदो विलोएहि । केसाकेसी संपहारो संवुत्तो ।

चोरः—हन्त ! तदेवात्र संवृत्तम् । वात्सिका आवन्तिकाश्च खल्वमी योधाः ।
एते हि—
समुन्नदन्तो भृतचापशूलप्रासासिशक्तिक्षुरिकागदाद्यैः ।
परस्परं घ्नन्ति रुषा प्रवीरा द्विधा विभक्ता इव मृत्युदंष्ट्राः ॥

1. हस्तिपकः सखड्गभीषणं ... ... .... (?)
सिंहनादं वनकच्छदो निर्गतं शत्रुबलं परीक्षितं च अस्माकं योधैः ।
2. आर्य ! भीततया सुष्ठु अहं व्याकुलः । क एष प्रदेशः ?
3. आर्य ! इदानीं खलु मया अभिज्ञातम् ।
4. आर्य ! इत इतो विलोकय । केशाकेशि संप्रहारः संवृत्तः ।

चेटः—[1] अय्य ! एदस्स सलरुक्खस्स समीवे चिट्ठिअ सुहं णं पेक्खिस्सामो ।

चोरः—अरे ! सम्यगुपलक्षितं भवता । (उभौ परिक्रम्य तिष्ठतः)

चेटः—[2] अय्य ! को णु खु एसो पदुमवणं विअ जोहाणं मुहवणं छिंदंतो तुरअ-चक्कं विअ जुद्धमंझे परिब्भमदि ?

चोरः—अये ! नन्वेष वत्सराजः अयं हि—

हुतहुतवहतेजाः कुञ्चितभ्रूपताकः
प्रचुररुधिरलिप्तः प्रोद्यतप्रांशुखड्गः ।
विचरति गतशङ्कः शत्रुसंघान् विनिघ्नन्
तुरगगतिविशेषात् सर्वतो दृश्यमानः ॥

चेटः—[3]अय्य ! एसो खु सबरराओ "अरे कच्चाअणा ! पुत्तं मे साणुगं एसिअ कहिं गच्छसि" त्ति भणिअ भट्टिणो समीवं एव्व धावइ ।

चोरः—अरे ! पश्य पश्य ।

परिघूर्ण्य भुजेन रोषदीप्तो
नृपतिः काञ्चनतालसन्निभेन ।
अवधीदुरसि प्रदीप्तशक्त्या
द्विषमेषो न्यपतत्क्षितौ गतासुः ॥

चेटः—[4] अय्य ! मज्जिदा विअ भूमी भट्टिणा णिहदेहिं सबरबळेहिं दुद्दिणं विअ वणगहणम् ।

चोरः—सम्यगाह भवान् ।

यथा यथा हरिरिव माहिषं गणं
नराधिपः समभिनिहन्ति निर्दयम् ।

1. आर्य ! एतस्य सालवृक्षस्य समीपे स्थित्वा सुखं ननु प्रेक्षिष्यावहे ।
2. आर्य ! को नु खल्वेषः पद्मवनमिव योधानां मुखवनं छिन्दन् तुरगचक्रमिव युद्धमध्ये परिभ्रमति ?
3. आर्य ! एष खलु शबरराजः "अरे कात्यायन! पुत्रं मे सानुगम् एष्यति, कुत्र गच्छसि" इति भणित्वा भर्तुः समीपमेव धावति ।
4. आर्य ! मज्जिता इव भूमिः भर्त्रा निहतैः शबरबलैः दुर्दिनमिव वनगहनम् ।

तथा तथा शबरबलं समन्ततो
निशामुखे तिमिरमिवाभिवर्धते ॥

चेटः—[1] ह द्धि ! हदा सव्वे भट्टिणो जोहा ।

चोरः—अरे ! गता स्वामिपिण्डानृण्यमिति ब्रूहि ।

चेटः—[2] कोसुम्भरणकञ्चुओ हिउडिभग्गभीसणो तव्वणअणो आअण्ण-पुण्णचाओ को एसो ?

चोरः—अयं ननु शालङ्कायनः । एष खलु राजानं सस्मितं बाणैरलंकुर्वाणः—
शरेण तीक्ष्णायसतेजनेन
पादोरुदेशे न्यवधीन्नरेन्द्रम् ।

चेटः—[3] ह द्धि !

चोरः—प्रासेन राज्ञा निहतोंऽसमूले
व्यपेतसंज्ञो न्यपतद्धरायाम् ॥

चेटः—[4] अविहा ! एदेण अजं णळगिरिपडिमेण हत्थिणा सरमअं विअ भट्टारं करअन्तो अहिपददि हत्थिजोहो ।

चोरः—अहो, बलौदार्यं राज्ञः !
उद्वीक्ष्यैनं रौद्रमभ्यापतन्तं
राजा प्रासं क्षिप्तवानुग्रतेजाः ।
भिन्नात्मासौ विग्रहे तेन नागः
त्रासाद्रौति प्रावृषीवाभ्रराशिः ॥

चेटः—[5] ह द्धि ! गआरोहएण हिअअप्पदेसे तोमरेण हदो भट्टिणो तुरओ ।

1. हा धिक् ! हताः सर्वे भर्तुर्योधाः ।
2. कौसुम्भरणकञ्चुकः भ्रुकुटीभङ्गभीषणः तप्तनयनः आकर्णपूर्णचापः क एषः ?
3. हा धिक् ।
4. अपिहा ! एतेन अयं नलगिरिप्रतिमेन हस्तिना शरमयमिव भर्तारं कुर्वन् अभिपतति हस्तियोधः ।
5. हा धिक् ! गजारोहकेन हृदयप्रदेशे तोमरेण हतो भर्तुस्तुरगः ।

+

चोरः—अरे ! पश्य पश्य । एष खलु राजा त्वरिततरं मञ्चादवरुह्य हरिणप्लुतकेनोत्प्लुत्य कैशिकामार्गेण प्रहारेण—

निकृत्तवान् द्विरदपतेर्महाभुजं
महासिना सदशनमश्मकर्कशम् ।
पतन्नसौ व्यपगतजीवितोऽवधीत्
स्वशस्त्रिणः स्वयमचलाभविग्रहः ॥

चेटः—[1] अय्य ! अत्थग्गदो भअवो सुय्यो । धूमाअदि खु सव्वं वणगहणम् ।

चोरः—सम्यगुक्तं शेखरकेण ।

न्यस्यैव गङ्गामवतीर्य सन्ध्यां
रणाजिरेऽस्मिन् क्षतजाभिताम्रे ।
परं स्वतेजश्च नरेन्द्रसिंहे
निमग्नवानम्बुनिधौ विवस्वान् ॥

चेटः—[2] अय्य ! भट्टिणो भीददाए तहिं तहिं रुक्खावुदसरीरा ठिदा संभु (सबर ?) वीरा ।

चोरः—एष खलु राजा—

कृत्वा सुखेन गणनीयमरातिसैन्यं
भूमिं कळेबरशतैरतिदुर्गमां च ।
युद्धाङ्गणे चरति भूमिपतिः श्रमार्तः
गाढप्रहारपरिविह्वलयेव गत्या ॥

चेटः—[3] ह द्धि ! पडिदो भट्टा ।

चोरः—इदानीमस्तमितः सूर्यः ।

चेटः—[4] अय्य ! एसो खु भट्टा उज्झिदसज्जोपसुट्टो विअ सीहो भीदभीदं उवअदेहि अमित्तेहि बद्धो ।

1. आर्य ! अस्तंगतो भगवान् सूर्यः । धूमायते खलु सर्वं वनगहनम् ।
2. आर्य ! भर्तुः भीततया तत्र तत्र वृक्षावृतशरीराः स्थिताः शबरवीराः ।
3. हा धिक् ! पतितो भर्ता ।
4. आर्य ! एष खलु भर्ता उज्झितसत्त्वोपसृष्ट (?) इव सिंहो भीतभीतमुपगतैः अमित्रैः बद्धः ।

चोरः—कष्टं कष्टम् !

भूमिः कराग्रेण विवर्तिताद्य
श्वासेन भग्नो हिमवान् महाद्रिः ।
आसारवृष्ट्या शमितोऽग्निरौर्वो
विनिर्हतः कीटशतैरनन्तः ॥

चेटः—[1] अय्य ! एहि, इह ण ठादव्वं अह्मेहिं ।

चोरः—तथास्तु (परिक्रम्य) अहो खलु नु विधेर्दुरतिक्रमता ! एष हि---

अतुलबलपराक्रमप्रभावः
प्रथितयशाः समरव्रणार्द्रगात्रः ।
नरपतिररिभिर्निबध्य नीतो
बलिरिव भोगिपभोगपाशबद्धः ॥

(निष्क्रान्तौ)

॥ द्वितीयोऽङ्कः ॥

1. आर्य ! एहि, इह न स्थातव्यमस्माभिः ।

## ॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति सचिन्तो यौगन्धरायणः)

**यौग**—(विष्णोर्नामानि पठन्)

विष्णुस्त्रिधामा भगवानुपेन्द्रो
नारायणश्चक्रधरो मुरारिः ।
दामोदरः शौरिरनन्तमूर्तिः
कृष्णोऽच्युतः कंसरिपुर्मुकुन्दः ॥

(परिक्रम्य) परेद्युः प्रभृत्यहं दुःस्वप्नं पश्यामि । नागवनं च प्रविष्टवान् स्वामी । किं नु खलु भवेत् ! (निश्वस्य) अहो नु खलु स्नेहबलदुर्बलस्य मनसो नित्यातुरता ! कुतः—

तस्यापरैरपरिधृष्यबलप्रभाव-
श्रीवीर्यशौर्यधृतितामभिजानतोऽपि ।
तत्तद्विकल्प्य हृदयं परिवेपते मे
प्रेम्णा सहैव सततं भ्रमतीव दुःखम् ॥

(परिक्रम्य तिष्ठति)

**प्रतीहारी**— (प्रविश्य) [1]कहिं णु हु अय्यजोअंधराअणो । (विलोक्य) एसो चन्दणमंडपे ठिदो । जाव उवसप्पामि । (उपेत्य) जेदु अय्यो । अय्य ! उज्जयिणीदो को वि पत्तहत्थो आअदो ।

**यौग**—भवति ! प्रवेशयैनम् ।

**प्रती**—[2]जं अय्यो आणवेदि (निष्क्रम्य चारेण सह प्रविश्य) एसो अय्यो, उवसप्पदु । (निष्क्रान्ता)

1. कुत्र नु खलु आर्ययौगन्धरायणः? एष चन्दनमण्डपे स्थितः। यावदुपसर्पामि। जयत्वार्यः । आर्य ! उज्जयिनीतः कोऽपि पत्रहस्त आगतः ।
2. यदार्य आज्ञापयति । एष आर्यः, उपसर्पतु ।

**चारः**—(उपसृत्य) [1]जेदु अय्यो ।

**यौग**—स्वागतम् । भद्र ! का वार्ता तत्र ?

**चारः**—[2]एसो खु संकिंचाअणीए (सालंकाअणीओ ?) लेहो ।

**यौग**—आनय (गृहीत्वानुवाच्य) भद्र ! कदा शालङ्कायनः सनीलगजो निर्गतः ?

**चारः**—[3]अज्ज दसमो दिअसो ।

**यौग**—किमर्थं पुनस्त्वया विळम्बितम् ?

**चारः**—[4]सव्वे कोसंबीमग्गा बंधाविदा । तेण अहं विळंबिअं आअदो ।

**यौग**—(आत्मगतम्) अनाथाः कृता वयं प्रद्योतेन, अथवा स्वामी ।

अतीव दीर्घायुरतीवशूरः
  शस्त्रैरवध्यो मतिमान् कृतास्त्रः ।
श्रियः परं धाम च सार्वभौमः
  स्वस्थं विजित्यैष्यति शत्रुसङ्घान् ॥

(प्रकाशम्) भद्र ! विश्रम्यताम् ।

**चारः**—[5]जं अय्यो आणवेदि (निष्क्रान्तः)

**यौग**—अतिक्रान्त इव कालः । किं नु खलु कर्तव्यमिदानीम् ? अथवा ससंशयत्वाद्दातव्य एव लेखः । स्वस्तिके !

**प्रतीहारी**—(प्रविश्य)[6]अय्य ! इअं ह्मि ।

**यौग**—शीघ्रं लेखावासात् लेखनीयं पत्रं चानय ।

**प्रती**—[7]जं अय्यो आणवेदि । (निष्क्रान्ता)

1. जयत्वार्यः ।
2. एष खलु शालङ्कायनीयो लेखः ।
3. अद्य दशमो दिवसः ।
4. सर्वः कौशाम्बीमार्गः बन्धितः । तेनाहं विलम्बितमागतः ।
5. यदार्य आज्ञापयति ।
6. आर्य ! इयमस्मि ।
7. यदार्य आज्ञापयति ।

**यौग**—(निश्वस्य)

अपि नाम भवेन्नृपस्य शान्ति-
निरतस्य ग्रहणे वनद्विपानाम् ।
अपि नाम न लक्षतां च यामः
स्फुटधिग्वादशरस्य पण्डितानाम् ॥

**प्रतीहारी** —(प्रविश्य)[1]आणीदं मए जहाणत्तं सव्वम् ।

**यौग**—भद्रे ! आनय ।

**प्रती**—[2] अय्य ! इदं । (दत्वा निष्क्रान्ता)

**यौग**—किं नु खलु हस्तान्मे लेखनी पतिता (विचार्य) भवत्वहमेव तत्र यास्यामि ।

**प्रतीहारी**— (प्रविश्य)[3] जेदु अय्यो । उपाअमस (उपासअमठ?) समीवादो किळबन्धओ एअदो ।

**यौग** —(आत्मगतम्) बन्धक इति । एतदप्यनिमित्तमेव । (प्रकाशं) अहमेवैनं प्रत्युद्गमिष्यामि ।

(उभौ परिक्रामतः)

**यौग**—(निश्वस्यात्मगतम्) निराशमिव मे मनः स्वामिनं प्रति । अथवा अनियतं हि निमित्तं नाम ।

**प्रती**—[4]अय्य ! एसो खु सो । (निष्क्रान्ता)

**यौग**—(विलोक्य) अये ! दृष्टपूर्व इव ।

(प्रविश्य पाशुपतवेषो हंसकः)

[5]जेदु भवम् ।

**यौग**—अये ! हंसको दिष्ट्या वेषान्तरेणायमागतः ।

1. आनीतं मया यदाज्ञप्तं सर्वम् ।
2. आर्य ! इदम् ।
3. जयत्वार्यः । उपासकमठ(?)समीपात् किल बन्धक आगतः ।
4. आर्य ! एष खलु सः ।
5. जयतु भवान् ।

यौग—अये ! हंसको दिष्ट्या वेषान्तरेणायमागतः ; कार्यविशेषो विद्यत इति नूनम् । (प्रकाशम्) किमस्ति प्राणधारणोपायः ?

हंस—[1](आत्मगतम्) विदिदो ह्मि । (प्रकाशम्) धीरो खु अय्यो !

यौग—अल्पैरक्षरैरनल्पमुक्तम् ।

हंस—[2] अय्य !

यौग—तिष्ठ तावत् । बहूपह्वरमिदं स्थानम् । कर्णे कथय ।

हंस —[3]अय्य ! तह । (कर्णे) एव्वं विअ ।

यौग—हा स्वामिन् ! (इति मोहमुपगतः)

हंस—(उदकेन मुखमवसिच्य)[4] समस्ससदु समस्ससदु अज्जो ।

यौग—(प्रत्यागत्य) हा देव ! (इति पुनर्मोहमुपगतः)

हंस—[5]समस्ससदु समस्ससदु अय्यो ।

यौग—(प्रत्यागत्य)

धिङ्मन्त्रिणो धिक्प्रभुशक्तिमत्त्वं
धिङ्नीतिशास्त्रं धिगुपायचिन्ताम् ।
न विद्यते किञ्चन जीवलोके
प्रत्यर्थिभूतं भवितव्यतायाः ॥

हंस—[6]सुणाहि सव्वम् ।

---

१. विदितोऽस्मि । धीरः खल्वार्यः !

२. आर्य !

३. आर्य तथा । एवमिव ।

४. समाश्वासयतु समाश्वासयत्वार्यः ।

५. समाश्वासयतु समाश्वासयत्वार्यः ।

६. शृणु सर्वम् ।

**यौग**—(उत्थाय) कथयतु भवान् कथयतु । अथवा आगच्छ चन्दनमण्डपे विश्वस्तः तत्रैव निःशङ्कं श्रोष्यामः ।

(उभौ परिक्रामतः)

**यौग**—भो ! मया मोहमुपगतेन न खलु मन्त्रस्तावि वचनमुक्तम् ?

**हंस**—[1]णत्थि किंचित् ।

**यौग**—दिष्ट्या !

**हंस**—[2]अय्य पविट्ठं चन्दणमण्डवम् ।

**यौग**—

अस्त्रेणेन्द्रजिता प्रसह्य समरे यद्रामरामानुजौ
बद्धाविल्यवदन्महर्षिवृषभो वाल्मीकिराद्यः कविः ।
बन्धात्प्रत्यथितं तदद्य नृपतेः पूर्णस्य सर्वैर्गुणै-
र्दैवं मुख्यतमं नयादि सकलं खेदावहं केवलम् ॥

(उपविश्य) भो हंसक ! गाढप्रहारप्रवृद्धमूर्च्छाप्रवासितस्मृतिः स्वामी बद्ध इति शङ्के ।

**हंस**—[3]अय्य ! अण्णहा कहं भविस्सदि ? मए उण मत्थअळद्धखग्गप्पहारेण चिरेण सुण्णं उवळंभिअ बंधिअ णीअमाणो दिट्ठो ।

**यौग**—बद्ध्वा नीयमानो दृष्टः ! भोः !

मयि जीवति नाम वत्सराजो
गतपा (गजपा) वारणराजदीर्घबाहुः ।

---

१. नास्ति किञ्चित् ।

२. आर्य ! प्रविष्टं चन्दनमण्डपम् ।

३. आर्य ! अन्यथा कथं भविष्यति । मया पुनः मस्तकलब्धखड्गप्रहारेण चिरेण शून्यमुपलभ्य बद्ध्वानीयमानो दृष्टः ।

वशतामविशद्द्विषां जनानां
किमतः कष्टतरं नु नाम लोके ॥

हंस—[1] तदो तहिं एव्व पाणं परिच्चत्तुं ववसिदोवि अय्यस्स इमं वुत्तन्तं भणिअ मरिस्सं त्ति आअदो म्हि ।

यौग—अतीव कर्तव्यमनुष्ठितं भवता । कुतः ?

आदौ यथा प्रवृत्तं
कार्यं लोकैरसंविदितमेव ।
शक्यं यथानुरूपं
प्रतिपत्तुं वञ्चयित्वान्यान् ॥

हंस—[2] अदो एव्व मए वेसपरिवट्टो किदो ।

यौग—साधु कृतम् ! अपि जानीषे क नु खलु वर्तते स्वामी ?

हंस—[3] उज्जयिणीं एव्व णीदो त्ति तक्केमि ।

यौग—कथमिव ?

हंस—[4] सुदं मए साळंकाअणवअणं सवअणं (सावहाणं ?) "सूरा णीदीमंतो वच्छराअस्स सइवा ; ता सिग्धं उज्जइणी एव्व गंतव्वा" त्ति ।

यौग—हा कष्टम् !

---

१. ततः तत्रैव प्राणान् परित्यक्तुं व्यवसितोऽपि आर्यस्येमं वृत्तान्तं भणित्वा मरिष्यामीति आगतोऽस्मि ।

२. अत एव मया वेषपरिवर्तः कृतः ।

३. उज्जयनीमेव नीत इति तर्कयामि ।

४. श्रुतं मया सालङ्कायनवचनम् (सावधानं ?) "शूरा नीतिमन्तो वत्सराजस्य सचिवाः । तच्छीघ्रम् उज्जयिन्येव गन्तव्या" इति ।

शूरा वयं किल वयं किल नीतिमन्तो
यातः सपत्नवशतामवशः पतिर्नः ।
तस्यैव वा वचनमस्तु तथैव पुंसां
शौर्यं नयश्च महति व्यसने प्रथेते ॥

**हंस**—[1] अय्य ! तारिसं परिभवं अणुभविअ मिस्सदि ण खु भट्टा ?

**यौग**—मा मैवम्, पश्य ।

अन्तर्निगूढामर्षाणां तेजःसत्त्वक्षमावताम् ।
नास्त्यसह्यतरं दुःखं महतां धैर्यशालिनाम् ॥

**हंस**—[2] उज्जइणीं गदस्स भट्टिणो ण हु किंचि अणिट्ठं भवे ?

**यौग**—तत्रापि नास्त्यपायः ।

**हंस**—[3] कहं विअ ?

**यौग**—अस्मत्स्वभावानभिज्ञतया स्वामिनं प्रत्यपायेऽसति रुमण्वतो मम वा प्रद्योतं विना नास्त्यन्या गतिरित्याशङ्कमानः तत्रभवान् भरतरोहकः सर्वप्रकारेण स्वामिनं परिपालयिष्यति ।

**हंस**—[4] एवं होदु ।

**यौग**—(विचिन्त्य) हंसक ! त्वमिदानीं नगरान्निष्क्रम्य स्वेनैव वेषेण हतो राजेति प्रकाशयन्नागत्य निवेदय ।

**हंस**—[5] अय्य ! तह । (निष्क्रान्तः)

---

१. आर्य ! तादृशं परिभवमनुभूय मृष्यति न खलु भर्ता ?
२. उज्जयनीं गतस्य भर्तुर्न खलु किञ्चिदनिष्टं भवेत् ?
३. कथमिव ?
४. एवं भवतु ।
५. आर्य ! तथा ।

यौग—(पत्रं लेखनीं च आदाय सचिन्तम्) रुमण्वता राज्ञा चेमान्यक्षराणि प्रबुध्यन्ते नान्यैः, अतो लेखविसंवादे सत्यपि नास्ति मन्त्रभेदः । (लिखित्वा संवेष्ट्य) कोऽत्र भोः ?

पुरुषः (प्रविश्य)—[1] जेदु जय्यो ! अहं दओ (करभओ ?) ।

यौग—अद्य खल्विहागमिष्यति रुमण्वानिति श्रूयते । शीघ्रमेव लेखं तस्मै प्रापय ।

पुरु—[2] अय्य ! तह । (गृहीत्वा निष्क्रान्तः)

यौग—लिखितं च यथा कर्तव्यं रुमण्वतः । सुष्ठु खल्वहं चक्षुर्मोहिनीं विद्यां जानामि । अतः—

विमोह्य नेत्राणि तथा जनानां
प्रविष्टवद्दारुचितां प्रदीप्ताम् ।
गत्वा पुरीमुज्जयिनीं पतिं मे
विमोचयिष्यामि नयेन शत्रोः ॥

कष्टं नाम । किं नाम मे मुखान्निर्गतम् । कोऽहम् ? कः स्वामी ?

सिंहा यथा परपराक्रमसाधितानि
खादन्ति नैव पिशितानि बुभुक्षयार्ताः ।
दुःखे महत्यपि तथैव परेण लब्धान्
वाञ्छन्त्यसूनपि न मानधना महान्तः ॥

अतः प्रद्योतं वञ्चयित्वा स्वामिनो यथाभीष्टकारी भविष्यामि ।

प्रतीहारी—(प्रविश्य) [3] जेदु अय्यो ! भट्टिणो उपज्झाओ हंसओ रुदंतेहिं जणेहिं परिवुदो दुवारे चिट्ठिदि ।

---

१. जयत्वार्यः ! अहम्--- (करभकः ?)
२. आर्य ! तथा
३. जयत्वार्यः ! भर्तुरुपाध्यायो हंसको रुदद्भिर्जनैः परिवृतो द्वारे तिष्ठति ।

यौग—किं किं तन्ना(तेना ?)गतम् । अहमेवैनं प्रत्युद्गमिष्यामि ।

(उत्थाय परिक्रामतः)

प्रती—[1] अय्य ! आअदं ह्म चोणीरगोरअं (?) ।

यौग—भवति ! त्वमिदानीमभ्यन्तरं प्रविश ।

प्रती—[2] अय्य ! तह (निष्क्रान्ता) ।

(ततः प्रविशति साश्रुर्हंसकः नगराध्यक्षश्च)

हंस—[3] अय्य ! इदो दे भट्टा पज्जोदस्स बलेहिं णीळणाअव्ववदेसेण (इति पादयोः पतति)

यौग—हा स्वामिन् ! हा सखे ! (मोहमुपगत इव)

अध्यक्षः—समाश्वासयतु ।

यौग—(प्रत्यागत्येव) धिगद्याप्यहं जीवामि । अस्थाने मामपास्य गतो भर्ता ।

विहाय मां यद्यपि देव यातो
दिङ्नागजेन्द्रग्रहणाय नाकम् ।
अथाप्यहं त्वामनुयाम्यवश्यं
चितां प्रविश्याग्निविधूतपाप्मा ॥

अध्यक्षः—इदानीं खलु वयं विनष्टाः ।

यौग—भो हरिवर्मन् !

अध्यक्षः—आज्ञापय ।

यौग—गच्छ त्वं शीघ्रं यमुनातीरे चितां कारय ।

अध्यक्षः—प्रसीदत्वार्यः । नार्हति भवानस्मान् विनाथीकर्तुम् ।

---

१. आर्य ! आगताः स्मः चतुर्द्वारगोचरम् (?)
२. आर्य ! तथा ।
३. आर्य ! इतस्ते भर्ता प्रद्योतस्य बलैः नीलनागव्यपदेशेन ।

यौग—अनिश्चितमपि मया प्रोक्तपूर्वम् ?

अध्यक्षः—हन्त ! त्यक्ता एव वयम् । (रुदन्निष्क्रान्तः)

हंस—[1] अय्य ! किं एदं ?

यौग—उज्जयिनीमहं यास्यामि ।

हंस—[2] जइ अय्यो गओ णिस्संसअं रुमण्णो वि तहिं आगमिस्सदि ।

यौग – ततः किम् ?

हंस—[3] पविट्ठो भवे एत्थ पंचालो ।

यौग पिङ्गळादयस्तं निवारयिष्यन्ति ।

हंस—[4] जुद्धं णाम अणिअभजअत्तेविणं रक्खिदव्वा (?) ।

यौग—समानवंश्या ननु राज्ञो रिपवः ।

हंस—[5] मए उण किं कादव्वं ?

यौग—यद्रुमण्वता प्रोक्तम् ।

ब्राह्मणः—(प्रविश्य) स्वस्ति भवते ! सर्वाः प्रकृतयस्तत्रागमनमिच्छन्ति ।

यौग—किं स्वामिनः समीपे ?

ब्राह्म—न हि । राजभवने ।

यौग—निवृत्त इदानीं राजभवनव्यापारः ।

ब्राह्म—तथापि ननु सन्ति तस्य त्रयो भ्रातरः ।

यौग—किं तैः ?

ब्राह्म—तेषामेकं राज्येऽभिषिच्य प्रद्योतवैरनिष्क्रयः कर्तव्यः । न चिता प्रवेष्टव्येति प्रकृतिजनानां सन्देशः ।

---

१. आर्य किमेतत् ?

२. यद्यार्यो गतः निस्संशयं रुमण्वानपि तदा अगमिष्यति ।

३. प्रविष्टो भवेदत्र पाञ्चालः ।

४. युद्धं नाम अनियतभद्रम् ; आत्मापि नूनं रक्षितव्यः (?)

५. मया पुनः किं कर्तव्यम् ?

यौग—नान्यत् ।

भ्राम—दुःखं ननु चिताप्रवेशः ।

यौग—तस्मादपि दुःखतरं स्वामिनो वियोगः ।

भ्राम—रक्षितव्या ननु प्राणाः ।

यौग—ततोऽपि प्रतिज्ञा ।

भ्राम—वन्ध्यो ननु निष्कारणजीवितत्यागः ।

यौग—भर्तृदर्शनहेतुत्वादवन्ध्यः ।

भ्राम—अनियतं हि तत् ।

यौग—अनिश्चितानामेतत् ।

भ्राम—सन्दिग्धा ननु परलोकाः ।

यौग—निस्सन्दिग्धा मम ।

भ्राम—न शक्ष्याम्यहमतः परं वक्तुम् ।

हंस—[1] अळं, गच्छदु अय्यो । ण सक्कं परिस्समेण अण्णहा काादुम् ।

भ्राम—भोः ! तथा (निष्क्रान्तः) ।

नगराध्यक्षः—(प्रविश्य) आर्य ! कृतं यथाज्ञप्तम् ।

यौग—अहो ! प्रियं कृतम् ।

(उत्थाय सर्वे परिक्रामन्ति)

हंस—[2] अहो ! भट्टिणो उवरि अणुराओ पकिडिजणाणं, णत्थि मुह (हं) अबंफदुद्दिणं ।

यौग—सम्यगाह भवान् । इयं हि—

---

१. अलं, गच्छत्वार्यः । न शक्यं परिश्रमेण अन्यथा कर्तुम् ।

२. अहो ! भर्तुरुपरि अनुरागः प्रकृतिजनानाम् , नास्ति मुखम् अबाष्पदुर्दिनम्।

सचिवद्विजपौरयोषितां
वदनैः सन्ततबाष्पवर्षिभिः ।
नलिनीव विराजते पुरी
प्रचुरासारजलार्द्रपङ्कजा ॥

अध्यक्षः—आर्यस्य चिताप्रवेशश्रवणेन द्विगुणीकृतः प्रकृतिजनानां सन्तापः ।

हंस—[1]णिग्गदो भवणादो ।

यौग—भो हरिवर्मन् ! यावद्रुमण्वानागच्छति तावदस्यां नगर्यां अप्रमादेन भवितव्यम् ।

अध्य—अथ किम् ।

हंस—(एकतो विलोक्य) [2]अहो ! णअरं विअ जमुणादीरं संवुत्तं ।

यौग—साधु बहुजनप्रत्यक्षं नाम विचारणीयं भवति ।

हंस—[3]इदो चिदा ।

यौग—(विलोक्य) एषा हि—

विकसत्प्रचुरोल्लसत्स्फुलिङ्गा
पवनालोलशिखासहस्रकीर्णा ।
मदुपागमनं नृपाय वक्तुं
त्रिदिवं प्रेषयतीव धूम एति ॥

(परिक्रम्य) हंसक ! गच्छ त्वमिदानीम् । यौगन्धरायणो गतः स्वामिसमीपमिति रुमण्वन्तं ब्रूहि ।

---

१. निर्गतो भवनतः ।
२. अहो ! नगरमिव यमुनातीरं संवृत्तम् ।
३. इतश्चिता ।

हंस—[१]अय्य ! तह (पादयोर्निपत्य साश्रुमुखो निष्क्रान्तः) ।

यौग—पुष्पं पुष्पम् ।

(प्रविश्य चाङ्गरिकाहस्तः)

चेटः—अय्य ! इदं पुष्पम् ।

यौग—(प्रगृह्य तामर्चयति)

चेटः—[२]सुणिस्समहं भट्टिणो मरणं ; पेक्खिदुं ण पारेमि । (रुदन्निष्क्रान्तः)

यौग—(आत्मगतम्) बद्धमिदानीं विद्यया जनानां चक्षुः । (प्रकाशम्) भोः ।
सर्वान् पौरान् विज्ञापयामि । यत्किञ्चिन्मे स्खलितं तन्मर्षणीयं भवद्भिः !
(चितां प्रदक्षिणीकृत्य) एष भोक्षितां प्रविशामि । (उल्लङ्घ्य परिक्रामति)
(नैपथ्ये हाहाकारः क्रियते)

यौग—दिष्टया जनाः सर्वे वञ्चिताः । तथा हि —

केचिद्भूमितले पतन्ति विचरन्त्येके सहाहारवाः
केचिन्मुक्तशिखा रुदन्ति विलपन्त्युद्बाहवः केचन ।
केचिद्ग्रावणि पातयन्ति च शिरः सर्पन्ति केचित्क्षितौ
केचिद् घ्नन्ति करैरुरो मुहुरयं सिद्धप्रयोगो मम ॥

अतः खल्वहम्—

उन्मत्तवेषः सुखमुज्जयिन्यां
भ्रान्त्वा यथाहं प्रतिपद्य कार्यम् ।
इहागमिष्यामि सहैव भर्त्रा
विकासयन् पौरजनाननानि ॥

---

१. आर्य ! तथा ।
२. श्रोष्याम्यहं भर्तुर्मरणम् ; प्रेक्षितुं न पारयामि ।

संप्रति हि—

उपागतं वमदिव दिङ्मुखैस्तमो
  निशामुखं परभृतकर्णमेचकम् ।
परिक्षरत्तिमिरपरीतमम्बरं
  शनैः शनैरवतरतीव मेदिनीम् ॥

(निष्क्रान्तः)

॥ इति तृतीयोऽङ्कः ॥

## ॥ चतुर्थोऽङ्कः ॥

( ततः प्रविशति डिण्डिकवेषो हंसकः )

हंस —ससमुद्दळे सळरुक्खसमुळासुणसिद्धणाअं धञ्ञधम्माधादेहाणं एक्केण विणा सएळोअं । (विचिन्त्य) अज्ज खु मए पअळाउज्जइणी परिब्भमिदा । मुहुत्तअं इमं सीसुदेपउळे विस्समिस्सम् । ( परिक्रम्य ) इदं मे.......... ।*

---

*. एतावानेव भागः आदर्शे उपलभ्यते ।

# नागानन्दम्

## ॥ चतुर्थोऽङ्कः ॥

(ततः प्रविशति डिण्डिकवेषो हंसकः)

……सशुलासुलसिद्धणाअगंधव्वदण्डावादेणाहं एक्को विणा सअलेहिम् । अज्ज खु मए सअला उज्जयिणी परिब्भमिदा । ता मुहुत्तअं इमस्सि सुन्नदेवउले विस्समिस्सम् । (परिक्रम्य) इदं देवउलम् । जाव पविसामि । (विलोक्य) को णु खु एसो डिंडिओ जणेहिं परिवुदो णच्चन्तो आअच्छदि । (निरूप्य) अय्य वसन्तओ एसो खु ।

(ततः प्रविशति डिण्डिकवेषो नृत्यन् वसन्तकः)

वसन्तकः (गच्छन्)—अय्या परिस्संतं हि दिट्ठिआ णिव्वुत्तो सव्व ।

(परिक्रामति)

हंसकः—भो आअच्छ । तुए सह णच्छामि ।

वस—(विलोक्य) अए हंसओ । भो जइ मए जिदं तदो तुवं किं देसि ।

हंस—इदं [1]भसुमापसेसिअं देमि ।

वस—साहु णच्चिस्सम् । (उपसर्पति)

हंस—सुण्णं इदं देवउलम् । को णु खु अम्माणं [2]सक्की भविस्सदि ।

वस—देवो ।

हंस—वन्दामि । अय्य कदा तुवं आअदो ।

वस—जदा तत्तभवं गहिदो त्ति सुदो तदो एव्व अहं णाअवणादो णिक्कमिअ अणुपदं इह पविट्ठो म्मि ।

---

1. भासुमा 2. सक्खी

हंस—कहिं उण अज्जो भुज्जेदि ।

वस—मए उण अणेएहिं विलम्बेहिं पज्जोदो सुट्ठु आराहिदो । तहिं एव भुञ्जामि ।

हंस—उदयण एव्व[1] दाणिं अय्यो[2] सव्वुत्तो ।

वस—भो हंसअ को तहिं वुत्तन्तो ।

हंस—गहिदा कोसम्बी पञ्चालेण । इदा जुद्धे भट्टिणो भादरो ।

वस—भो सुदं मए अहिदम्[3] । तदो ।

हंस—तदो गलिअकुमारो[4] अंतरिक्खे....[5]मं उप्पादइदुकामो तहिं तहिं एव्व पविट्ठो ।

वस—साहु किदम् । तदो ।

हंस—अय्यो उण जोअंधराअणो ।

वस—सो मए दिट्ठो उम्मत्तवेसेण परिब्भमन्तो । रुमण्णो उण कहिम् ।

हंस—अय्यो उण रुमण्णो जुद्धे भट्ठो विअ (?) अपसरिअ इदो जाव कोसंबी (?) तहिं तहिं गामे किसिगोरिक्खवणज्जादिणा[6] पुरुट्ठो (?) पिअलापाण अट्ठक्कं अक्कमिअ सज्जन्तीए (?) विदूरे ट्ठिदो ।

वस—जुत्तम् । तदो ।

हंस—अय्यो उण तु [7]सअलअडवीमग्गं रक्खन्तो भद्दरुक्खरे विदुखरे (?) ट्ठिदो ।

वस—तदो ।

हंस—अंहाणं जोअंधराअणेण ट्ठाणासणकवलादिनिगूढेहि लधहेहि (?) अणुऊलमारुदमुत्तेहि जोअधूमेहि नलागिरि मत्तो किदो ।

वस—किण्णिमित्तम् ।

हंस—जदा उद्दामो णअरं ओदिण्णो भवे भट्टारं विणा णत्थि अण्णो पज्जोदस्स गरं (?) तदो तं आरुहिअ सुहं भट्टा गमिस्सदि ।

---

1. इदयवेदणो
2. अद्दा
3. पहिदं
4. कुमरो
5. a few syllables missing.
6. वणआदिणेण
7. सइल

वस—भो जुत्तं एदम् । अत्थिणा[1] वञ्चिदस्स अत्थिणा एव्व[2] पडिवञ्चणम् । तदो ।

हंस—अज्ज अय्यजोअंधराअणो सरिसे पिआरं उपलभिअ भणिदं हि । सुवो नलागिरी उद्दामो भविस्सिदि । तं गच्छ[3] तुवं छिड्डिविणिजसिं पिआर-व्ववदेसेण इह वसंतादीणं[4] विसिहहप्पमुहाणं[5] अंहाणं जोहाणं भणाहि —सुवो[6] सव्वे णिऊढा इह[7] सज्जा भविअ रच्छाए[8] चत्वरे तहिं तहिं देवउले चिट्ठ । हदग्गाघरे ब्भमपहारपसवालअवो..............................................................अम्[9] ।

हंस—अय्य तह ।

वस—कदि मत्ता दे ।

हंस—पञ्चदसाणि ।

वस—भो णित्तिणं खु अम्मेहिं इमं दुःखकत्तारम् ।

हंस—एव्वं एव ।

वस—चारप्पहाणोपठज्जदो ना आअच्छ । दाणिं णच्चिस्सामो ।

हंस—तह (नृत्यतः)

वस—भो जिदं खु दाणिं मए ।

(भस्मावसेचिकामाक्षिप्य निष्क्रान्तः)

हंस—अविहा एसो डिण्डिओ सव्वस्सं[10] मे आछिन्दिअ पलायदि । गहह अय्या ।

(इति निष्क्रान्तः)

प्रवेशकः[11]

(ततः प्रविशति राजा भरतरोहकश्च)

राजा—सखे भरतरोहक अरिर्मित्रमिति[12] पुंसां अनियत एव नियमः । पश्य—

---

1. अंह्णि
2. अत्थिणं एव
3. गुच्छ
4. वसन्तन्दीणं
5. विसंहप्पमुहाणं
6. सुवे
7. इहा
8. रिच्छाए
9. many syllables missing.
10. सव्वस्सं
11. This word is not in the Ms.
12. अरिमित्रमिति

यद्यप्यहं त्रिनयनानुमतं प्रविश्य तं पीडयाम्युदयनं गुणभावनार्थम् ।
चेतस्तथापि मम वेपत एव नित्यं स्नेहः क्व साम्प्रतममर्षविषः[1] क्व च प्राक् ॥ १

भरत—स्वामिन् देवसम्पदां तस्याभिमुख्यम् ।

(उभौ परिक्रामतः)

राजा—सेनापते शालङ्कायनस्य का वार्ता ।

भरत—स्वस्थीभूतः शालङ्कायनो भर्तुरवश्यं संदर्शनोत्सवेन आत्मानमनुग्राहयिष्यति ।

राजा—इच्छाम्यहं तस्यागमनम् ।

भरत—देव—

स्फुरदंशुसहस्रमालिना नवकालेयकपिण्डपाण्डुना ।
रविणा रचितोदयश्रियं वहतां काञ्चनमेतदासनम् ॥ २ ॥

राजा—यत् भवते रोचते (उपविशति)

(प्रविश्य)

प्रतीहारी—जेदु भट्टा । एसो सालङ्काअणो दुवारे ट्ठिदो

राजा—विजये तं प्रवेशय[2] ।

प्रती—जं भट्टा आणवेदि (निष्क्रम्य शालङ्कायनेन सह प्रविशति[3])

शाल—अद्य खलु मया—

अवसितनिजकार्यवत्तया सुखमिति राजकुलं प्रविश्यते ।
गुरुकुलमिव शास्त्रशालिना[4] समितिषु लब्धजयेन वादिना ॥ ३ ॥

प्रती—एसो खु भट्टा । उपसप्पदु अय्यो ।

---

1. विष
2. विजयंक प्रवेशाय
3. शालङ्काय; after this the syllables are missing. नेन सह प्रविशति is only a conjectural reading.
4. शास्त्रषा सना

(निष्क्रान्ता[1])

शाल--(उपसृत्य) विजयतां देवः ।

राजा—आर्य ।

मयि दूरावगाढस्य स्नेहौदार्यस्य चाङ्किकाः ।
तेजःशौर्यपदन्यासाः किं रूढास्ते[2] रणव्रणाः ॥ ४ ॥

शाल—स्वामिप्रसादप्रभवैरुदारैर्भाषामृतैस्तत्क्षणमेव पुंसाम् ।
वज्रप्रहारा अपि मर्मलब्धाः स्वस्थीभवेयुः किमु नाम शेषाः ॥ ५ ॥

भरत—सदृशमुक्तम् ।

राजा—अपि श्लोकगता गुणाः सिद्धा वैदेहीपुत्रे ।

शाल—उपसंख्यानगता अपि ।

राजा—कथमिव ।

शाल—नीलनागव्यपदेशेन समन्ततः शस्त्रप्रभाभासुरैरस्मद्योधैः परीतेन महति भयस्थाने विगतसंभ्रमम्[3]—

तेन प्रोक्तं धैर्यगाम्भीर्यशौर्यप्रज्ञातेजोनीतिदाक्षिण्यगर्भम् ।
वाक्यं सामाद्यं सोर्जितं श्रोत्ररम्यं शास्त्रीकर्तव्यं तद्बुधैः स्वार्थकामैः ॥ ६ ॥

भरत—एष संक्षिप्तविस्तरो नाम ।

राजा—ततः ।

शाल—देव--

यस्तस्य युद्धे महति प्रवृत्ते पराक्रमः साहसलाञ्छनस्य ।
प्रद्युम्नरामार्जुनभीमकर्णसाम्बाभिमन्युष्वपि चिन्त्य एव ॥ ७ ॥

भरत—किं स मृत्योर्निर्भय इव दृश्यते ।

---

1. निष्क्रान्तः
2. रूढा ते
3. विगसंभ्रमम्

शाल—सेनापते तत्रभवति वीरसेने प्रद्योतसैन्यजिघांसयैव[1] सरभसमभिपतति तरौ बद्धस्य महात्मनः—

विमुक्तसंत्रासतया सकारणैः स्फुटैर्वचोभिश्च ममाभवन्मतिः ।
परैरवध्योऽहमिति स्वयंभुवः[2] परं वरं किं स्वयमाप्तवानिति[3] ॥ ८ ॥

राजा—पुनर्वीरसेनेन किं कृतम् ।

शाल—पिशाचाविष्ट इव भूमौ न्यपतत् ।

राजा—हा ! नानुरूपं कृतम् । ततः ।

शाल—ततो मया तदानीं दृष्टवता त्वरिततरमुपेत्य मद्भागधेयेन राजा न गत इति बहु प्रियमुक्त्वा निर्मोच्य यानमारोप्य त्रिचुर्यानिर्गलवर्तव्यचरणः स इहानीतः ।

राजा—साधु निश्छिद्रं सर्वं कृतम् ।

भरत—इह तु पुनः—

यथा यथानेकशतार्तिसङ्कटे निपीड्यते धैर्यविदारिमारके ।
तथा तथातिस्थिरतां प्रयात्यसौ घटो यथा पाकहुताशमध्यगः ॥ ९ ॥

राजा—हा कष्टम् । ततः ।

भरत—देव इदं पुनरत्याश्चर्यम् । उपेत्य[4] यन्मया[5] सकणमलवणमसूपद्वितीयमन्नं दास्यते तदिदमभिन्नमुखराग[6] एव भुङ्क्ते ।

राजा—किमर्थं तथा क्रियते ।

भरत—तस्य विपदि विकारजिज्ञासया[7] शीघ्रं व्रणानां आरोपणार्थं च ।

राजा—केदानीं व्रणानामवस्था ।

---

1. प्रद्योतसौजिघासयैव
2. स्वयंभुव
3. किं वयमाप्तभादिरि
4. उपेद्य
5. मया. four dots above या; यन्मया is only a conjecture.
6. तदिदन्नमुखराग
7. विपदि निर्विकार जिज्ञासया

भरत—रूढाः सर्वे ।

राजा—सर्वमेतद्यथाचिन्तितं सिद्धम् । यौगन्धरायणस्य पुनरग्निप्रवेशो मां बाधते ।

भरत—सोऽपि तस्यानुक्तप्रकृतिसूचको विद्यते ननु रुमण्वान् नाम मनुष्यरूपी बृहस्पतिः ।

शाल—सत्यमेतत् ।

राजा—अहो नु खलु स्वभावसिद्धानां गुणानां अप्यव्यभिचारिता । कुतः—

अविदितँ इति नैकधा प्रयत्नाद्बहुदिवसं बहुधा परीक्ष्यमाणः ।
द्विगुणमभिविराजते गुणैः स्वैर्मणिरिव जातिविशेषवान् महार्हः ॥ १० ॥

शाल—अनुरूपमुक्तं देवेन ।

राजा—सेनापते अतिचिरं खलु संक्लिश्यते । को नु खलु तं मोक्तुमुपायः स्यात् ।

(प्रविश्य)

वसुवर्मा—जयतु स्वामी । नलागिरिरुद्दामो रथ्यामवतीर्णः ।

भरत—लब्ध इदानीं तं मोक्तुमुपायः ।

राजा—कथमिव ।

भरत—वत्सराजं विना कोऽन्यस्तं दुष्टवारणं गृह्णीयात् ।

वसु—साधु दृष्टं भवता ।

राजा—किं प्रतिपत्स्यते स इति मन्यते भवान् ।

भरत—स्वामिप्रसादादायत्तो हि तस्याभ्युदयः ।

शाल—सेनापते यद्यसौ हस्तिनमारुह्य तत एवापसरेत्[1] व्यर्थो नन्वस्माकं परिश्रमः स्यात् ।

भरत—एकाकी मार्गानभिज्ञः शत्रुणाधिष्ठितं राज्यमानीतश्च कुशलः क्वासौ यास्यति ।

शाल—अनवेक्ष्यापि तत्सर्वं यदि नामापसरेत् ततः किम् ।

भरत—रुध्यन्ते समन्ततः पन्थानो[2] दशभिः पुरुषसहस्रैरस्माकम् ।

---

1. पवावतरेत्  2. पुन्थानो

राजा—सखे आर्येण सह तत्र गत्वा विनिगलीकृत्य शीघ्रं नलागिरिग्रहणे यतस्व ।

भरत—देव तथा ।

(इति निष्क्रान्तः शालङ्कायनेन सह)

(ततः प्रविशति देवी वासवदत्ता काञ्चनमाला च)

देवी[1]—जादे वासवदत्ते किं ण[2] सिक्खसि तुवं णासईए वीणम् ।

वास—अम्ब णत्थि मे इच्छाणुरूवा वीणा ।

देवी—एसा दे असिक्खिदुकामदा ।

वास—णहि । अत्थि मे अभिप्पाओ वीणं सिक्खिदुम् ।

देवी—कहं पुण ण सिक्खसि ।

वास—तादस्स भणिअ अणुरूवं वीणं गेह्निस्सम् ।

देवी—कञ्चणमाळे । कहिं पुण महाराओ ।

काञ्च—भट्टिणि । निसामुहप्पासादे[3] ।

देवी—आअच्छ तहिं एव्व[4] गच्छामो ।

(सर्वाः परिक्रामन्ति)

राजा—वसुवर्मन्—

समर्थतां तस्य विजानतोऽपि गजं मदव्याळतमं ग्रहीतुम् ।
स्नेहेन कार्येण च कृष्यमाणं डोळायते सम्प्रति मानसं मे ॥ ११ ॥

वसु—स्वामिन् अपायशङ्कापुरःसरा हि स्नेहपरता नाम[5] ।

राजा—वसुवर्मन् गच्छ त्वं यथार्हं तस्य सत्कारो न किञ्चित् परिहर्तव्य इति भरतरोहकं ब्रूहि ।

वसु—देव तथा ।

(निष्क्रान्तः)

---

1. दे
2. किण
3. दिसमुह
4. एव
5. हि नाम स्नेहपरता नाम

काञ्च—भट्टिणि एसो णिसामुहप्पासादो[1] । आरोहदु ।

(सर्वा आरुह्य परिक्रामन्ति)

राजा—अये देवी चागता । एषा हि—

निसर्गसंसिद्धविशेषशोभया समन्विता वासवदत्तया प्रिया ।
विराजते हंसविलासगामिनी सचन्द्रलेखेव शरत्त्रियामिनी ॥ १२ ॥

देवी—(उपेत्य) जेदु महाराओ ।

राजा—अये देवि एतदासनम् । आस्यताम् ।

देवी—जं महाराओ आणवेदि ।

(उपविशति)

देवी—महाराअ अज्ज खु मए एक्कम् अच्छरिअं सुदम् ।

राजा—देवि किमिव ।

देवी—इमस्सि राअउलेऽपि इमाए अणुरूवा णत्थि वीणा ।

राजा—किम् उत्पन्नोऽस्या गान्धर्वेऽभिलाषः ।

देवी—आम ।

राजा—पतिरेव शिक्षापयिष्यति ।

देवी—अण्णहा मुद्धा भविस्सिदि ।

राजा—वत्से कीदृशी ते—

(वीणाहस्तः काञ्चुकीयः)

काञ्चु—जयतु महाराजः । इदं खलु शालङ्कायनेन प्रेषितं वत्सकुलसर्वस्वं वीणारत्नम् ।

राजा—(प्रतिगृह्य) आर्य—

---

1. दिसामुहप्पासादो

किमियं घोषवती सा बध्यन्ते वारणा यया हृदये ।
मदमधुकलितालिकुलप्रलापकलिलायतकपोलाः ॥ १३ ॥

काञ्चु—देव सैवेयम् ।

राजा—वत्से वासवदत्ते किमियं तवानुरूपा वीणा ।

वास—ताद पेक्खिद एव्व[1] सिणेहो सव्वुत्तो ।

राजा—त्वदर्थमेव नन्विहानीता ।

वास—आणेदु उण तदो । (प्रगृह्य) अहो माळा विअ ळहुआ । (तन्त्रीं विघाट्य) रूवादो विअ महुररवा ।

काञ्चु—इदं खलु भरतरोहकेनोक्तं प्रतिपन्नं सर्वं वत्सराजेन इति ।

राजा—अनुरूपं कृतम् ।

काञ्चु—उत्तरं ये (?) वीणामानयस्वेति तत्रभवता भरतरोहकेनोक्तम् ।

राजा—आर्य नीयताम् ।

काञ्चु—तथा ।

(वासवदत्ताहस्ताद्वीणामादाय निष्क्रान्तः)

राजा—किन्नु खलु वीणाप्रयोजनम् आं....[2]संमता घोषवती । तदिमां वत्सराजाय प्रदाय नळागिरिं ग्राहयितुकामेन तत्रभवता भरतरोहकेण न्याय्यं पर्येष्यति । अपि च—

तथा हि तस्य व्यतिगत्य यत्नं सेनापतेर्घोषवती गतेयम् ।
याताद्य वत्सेश्वरहस्तमेव भव्यं न शक्यं हि परैर्निरोद्धुम् ॥ १४ ॥

देवी—महाराअ को एसो वच्छराओ णाम ।

राजा—अस्या वीणायाः पतिः ।

वास—(आत्मगतम्) एसा णाम एव्वं सुभआ । सो णाम कीरिसो भवे ।

काञ्च[3]—भट्टिणि किं णु खु रच्छाए द्विजणो सहाहाकारं सद्दो पेक्खन्ति ।

राजा—(विलोक्य) अये नळागिरिरुद्दामो रथ्यामवतीर्णः । असौ हि—

---

1. पेक्खिदं एव्व
2. A few syllables missing.
3. Missing.

वेगोद्धूतैरावृतो वेणुजालैर्दानोद्दामो मन्द्रमन्द्रप्रणादः ।
मन्दं मन्दं दृश्यते वारणेन्द्रो नीहाराढ्यः शब्दवाहीव शैलः ॥ १५ ॥

देवी—महाराज को णु खु एसो पाआरहम्मरुक्खादिसमारूढेहि चोरजणेहि समन्तदो आलोअअमाणो[1] वीणादुतीओ रच्छं ओदिण्णो ।

राजा—देवि नन्वेष वत्सराजः । अयं हि—

द्विरदललितयानो यात्यसौ राजमार्गे प्रमुदितनरनारीदृष्टिभिः कीर्यमाणः ।
कुवलयदलवृष्ट्या सर्वतः पूज्यमानः प्रतिनव इव रम्यो जङ्गमो हेमयूपः॥ १६

वास—(आत्मगतम्) से एव्व साणुरूवा वीणा ।

देवी—महाराअ इमं दारं पेक्खिअ पुत्तसिणेहो विअ मे सव्वुत्तो ।

राजा—कथं न भविष्यति ।

देवी—किंणिमित्तं पुण एसो दारओ इह आअदो ।

राजा—हस्तिव्याजेन इहानीतः ।

देवी—कीस महाराएण तादिशो रमणीओ दारओ परिपीडितो ।

राजा—सर्वत्र अतिप्रसङ्गः व्यसनमित्युच्यते[2] । एष च अतीव हस्तिबन्धनव्यसनी । ततस्तं निवारयितुम् ।

देवी—दिट्ठिआ महारा....[3]विअ अणुकम्पिदो ।

काञ्च—आम । अय्यो सूरदा अहिमुहं आअच्छन्तं ह......[4]दअन्तो ठिदो एव्व ।

राजा—देवि पश्य । एष हि—

किञ्चित्प्रोच्छ्रितदीर्घपीवरकरः संकुञ्चितो वालधि-
निष्कम्पप्रविसारितश्रवणवान् रक्तो नृणां लोहितैः ।
आधावत्यतिरुष्टवानभिमुखं वत्सेश्वरस्य द्विपः
सान्ध्यो मेघ इव प्रचण्डपवनव्यालो रवेरन्तिकम् ॥ १७ ॥

---

1. ओलोलयमाणो
2. व्यसन इत्युच्यते
3. A few syllables missing.
4. A few syllables missing.

वास—ताद वारेहि हत्थिणम् । मे सहीयणा इ भवे ।

काञ्च—आकम्पदि मे हिअअम् ।

देवी—हद्धी संकुचिदहत्थो संपिडिअमाणसरीर[1] ओदिण्णो हत्थी ।

(नेपथ्ये सर्वतो हाहाकारः संवर्तितः)

राजा—अलमलं संभ्रमेण । एष खलु गीतवादित्रश्रवणव्यपगतमदोद्धतामर्षः शिष्य इव प्रणन्तुमुपगतो हस्ती । एष वत्सराजः भरतरोहकस्य हस्ते वीणां दत्त्वा—

आकुञ्च्य पादेन विषाणकोट्यां सलीलमभ्युन्नतपूर्वकायः ।
आरूढवान् कूर्परमूर्जितश्रीः पूर्वाचलं पूर्ण इवोडुराजः ॥ १८ ॥

देवी—इदानीं[2] मे पाणा आअदा ।

वास—ताद सिण्णं व्विअ........[3]वाताअणसमीवे चिट्ठिस्सम् ।

(उत्थाय तथा करोति)

काञ्च—भट्टिदारिए एसो भर........[4]मा विअ पासादं ओलोअदि । किं[5] आणेमि वीणम् ।

वास—आम ।

काञ्च—(निष्क्रम्य प्रविश्य) भट्टिदारिए आणीदा वीणा ।

[6](वासवदत्ता वीणां गृह्णाति)

(ततः प्रविशति वारणाधिरूढो वत्सराजः)

वत्स—भोः—

शृणु वचनमिदं मे त्वं महापद्मसूनो
गजवर मुनिशापात् स्थानतोऽसि व्यपेतः ।

---

1. संपिडिआमाणसरीरं
2. इदनीम्
3. A few syllables missing.
4. A few syllables missing.
5. कि
6. वास—वीणां गृह्णाति

व्रजति यमपरत्वं मुञ्च दुर्वृत्तमेतत्
पुनरपि गतशापो[1] यास्यसि[2] स्थानमेव ॥ १९ ॥

**काञ्च**—(जनान्तिकम्) चन्दो उदिदो विअ ।

**वास**—चन्दसहस्सादो वि पियदरो ।

**वत्स**—(उपसृत्य) जयतु देवः[3] ।

**राजा**— (उत्थाय वातायनमुपेत्य) वत्स वैदेहीमातः—

त्वया कृतं दृष्टवतोऽपि साक्षात् कर्मेदमन्यैर्मनसाप्यधृष्यम् ।
स्वप्नो नु माया न्विति[4] साद्भुतत्वात् पुनः पुनर्मे समुदेति बुद्धिः ॥२०॥

**वत्स**—देव सुखपरितोष्यं गुरुहृदयं नाम ।

**देवी**—रूपाणुरूवं इमं सवअणम् ।

**वास**—अज्ज खु मए जादं पुरुस एव्व पिअदस्सण त्ति ।

( वासवदत्तां दृष्ट्वा आत्मगतम् )

**वत्स**—का नु खल्वियम् ।

सस्नेहं सविलासं सव्रीळं सेङ्गितं सविभ्रान्तम् ।
दृष्टिं निपातयन्ती मयि स्थिताग्रे मणिस्निग्धा ॥ २१ ॥

**देवी**—जादे वासवदत्ते इह आअच्छ ।

**वत्स**—इयं सा वासवदत्ता । वासवेन विना[5] कोऽन्य उद्यादेनाम्[6] । इयं हि—

अमृतरसमयीव ह्यभावादतिमदनीयतया सुरामयीव ।
शशिकिरणमयीव[7] कान्तिलक्ष्म्या कुवलयरेणुमयीव सौकुमार्यात् ॥ २२ ॥

**काच**—भट्टिदारिए भट्टिणी संभावेदि ।

---

1. गतशापो
2. यास्यति
3. जयदुटवः
4. मायन्विति
5. विन
6. कोन्योद्यादेनाम्
7. शशिकिण

वास—अंब एसा आअच्छामि ।

राजा—वत्सराज शक्यमिव किमेनं विनये स्थापयितुम् ।

वत्स—अचिरादेवैनं सुविनीतं दर्शयिष्यामि ।

राजा—महान् खलु ममोपकारः कृतः स्यात् ।

वास—(आत्मगतम्) किण्णु खु परकेरअं विअ मे हिअअं सव्वुत्तम् ।

राजा—वत्स गच्छेदानीम् । महान् खलु ते परिश्रमः ।

वत्स—यदाज्ञापयति देवः ।

(परिक्रम्य तिष्ठति)

वास—(आत्मगतम्) पिअदूसओ विअ एसो पदेसो सव्वुत्तो ।

(प्रविश्य)

भरतरोहकः—जयतु स्वामी । किमिदानीं वत्सराजं प्रति कर्तव्यम् ।

राजा—अद्य प्रभृति गोलकपालकयोस्तृतीयो[1] वत्सराजः । अथवा प्रथम एव[2] ।

देवी—पिअं ......[3]

भरत—अत्यनुग्रहः कृतः ।

राजा—सखे वत्सराजं प्रति एवं कर्तव्यम् ।

(इति कर्णे कथयति)

भरत—यदाज्ञापयति स्वामी (निष्क्रान्तः)

राजा—चिरमिह निषण्णाः स्मः । तदागम्यताम् । उद्यानं प्रविशामः ।

(निष्क्रान्ताः सर्वे[4])

॥ इति चतुर्थोऽङ्कः ॥

---

1. पालयोस्तृतीयो not in the Ms.
2. प्रथममेव
3. Two syllables missing.
4. This stage direction is not in the Ms. According to the Ms. of Vatsarājaprabandha, the fourth Act does not e: d here, but only a little further.

The following stanzas in Vīṇāvāsavadattam are found in the Ms. of Vatsarājaprabandha belonging to the Government Oriental Manuscripts Library, Madras (R. No. 4334). The original Ms. belonged to one Ittīri Vāriyar in Malabar and it was returned to him after transcription. I have printed the stanzas exactly as they are found in the transcript.

p. 4. Stanza 1.

यद्यप्यहं त्रिनयनानुमतं प्रविश्य तं पीडयाम्युदयनं गुणभावनात्थम् ।
चेतस्तथापि मम वेरत एव नित्यं स्नेहः क साम्प्रतममर्षवि . . क च प्राक् ॥

p. 4. Stanza 2.

स्फुरदंशुसहस्रमालिना नवकारे . . पिण्डपाण्डुना ।
रविणा रचितोदयं श्रियं प्रहृतां काञ्चनमेतदासनम् ॥

p. 4. Stanza 3.

शाल—

अवसितनिजकार्यवर्तया खमिति राजकुलं प्रविश्यते ।
गुरुकुलमिव शास्त्रशालिना मितिषु लब्धजयेन वारिणा ॥

p. 5. Stanza 4.

राजा—

मयि दूरावगाढस्य स्नेहेनार्यस्य चाङ्किताः ।
तेजश्शौर्यपदन्यासा किं रूढास्तोरणव्रताः ॥

शाल—

अवसितनिजकार्यवा

p. 5. Stanza 5.

स्वामिप्रसादप्रभवैरुदारैर्भाषामृतैस्तं क्षणमेव पुंसाम् ।
वज्रप्रहारा अपि मर्मलब्धा स्वस्थीभवेयुः किम नाम शेषाः ॥

p. 5. Stanza 6.

तेन प्रोक्तं धैर्यगाम्भीर्यशौर्यप्रशातेजोनीतदाक्षिण्यार्भवाक्यम् ।
सामान्यं सोज्जितं श्रोत्ररम्यं शास्त्रीकर्तव्यं तं बुधैः स्वार्थकामैः ॥

p. 5. Stanza 7.

यस्तस्य युद्धे महति प्रवृत्ते पराक्रमः साहसलाञ्छनः सः ।
प्रद्युम्नरामाश्वभीमकर्णसाम्बाभिमन्युष्वविचिन्त्य एव ॥

p. 6. Stanza 8.

विमुक्त . . . तयता सकारणैः स्फुटैर्वचोभिश्च ममाभवन्मतिः ।
नरैरवध्योऽहमिति स्वयंभुवः परं परं कियत्मासवानि किम् ॥

p. 6. Stanza 9.

यथा यथा नैर्तिकशतार्तिसाकटे निपीड्यते धैर्यविदारिचार ।
तथा तथातिस्थिरतां प्रयात्यसौ घटो यथा पाकहुताशमध्यगः ॥

p. 7. Stanza 10.

राजा—

अविदित इति नैकधा प्रयत्नात् बहुदिवसं बहुधा परीक्ष्यमाणः ।
द्विगुणमभिविराजते गुणैस्स्वैर्मणिरिव जातिविशेषवान् महार्हः ॥

p. 8. Stanza 11.

समर्थतां तस्य विजानतोऽपि गजं मदव्यालतमं ग्रहीतुम् ।
स्नेहेन कार्येण च कृष्यमाणं डोलायते सम्प्रति मानसं मे ॥

p. 9. Stanza 12.

निसर्गसंसिद्धिविशेषशोभया सहिता वासवदत्तया प्रिया ।
विराजते हंसविलासगामिनी सचन्द्रलेखेव शरत्त्रियामिनी ॥

p. 10. Stanza 13.

किमियं घोषवती सा बध्यन्ते पराणा यया हृदये मद . . . . ।
कलितालिकुलप्रलाप कलिलायतकपोत . . . . तथा ॥

p. 10. Stanza 14.

एतस्य व्यतिगत्य यत्नां सेनापतेर्घोषवती . . . यम् ।
याताद्य वत्सेश्वरहस्तमेव भव्यं न शक्यं हि परैर्निरोद्धुः ॥

p. 11. Stanza 15.

वेगोद्धूतैरावृतो वेणुजालैर्दानोद्दामो मन्दमन्दप्रणादः ।
मन्दं मन्दं दृश्यते वारणेन्द्रः नीवाराढ्यः शब्दवाहीव शैलः ॥

p. 11. Stanza 16.

द्विरदललितयानो यात्यसौ राजमार्गे प्रमुदितनरनारीदृष्टिभिः कीर्यमाणम् ।
कुवलयदलदृष्ट्या सर्वतः पूज्यमानः प्रतिनव इव रम्यो जङ्गमो हेमयूपः ॥

p. 11. Stanza 17.

किंचित्प्रोज्झितदीर्घपीवरकरः संकुञ्चितो वालधिः
निष्कम्पप्रविसारितश्रवणवान्वृत्तो नृणां लोहितैः ।

आधावत्यतिदुष्टवानभिमुखं वत्सेश्वरस्य द्विपः
साध्यो मेघ इव प्रचण्डपवनव्यालो रवेरन्तिकम् ॥

p. 12. Stanza 18.

आम् । पादेन विषाणकोट्यां सलीलमभ्युन्नतपूर्वं . . . यः ।
आढवान् कूर्जरमूर्जितश्रीः पूर्वचलं पूर्वं . . . ङुराजः ॥

p. 12. Stanza 19.

शृणु वाचनमिदं मे त्वं महापद्मसूनो वरमुनिशापात्स्थानकोपेतः ।
व्रजनं पदत्वं मुञ्च दुद्वृत्तमेतं पुनरपि गतशापो यास्यसि स्थानमेतत् ॥
म्

Stanza 20. on p. 13. is missing in the collection

p. 13. Stanza 21.

सस्नेहं सविलासं सव्रीलं सेङ्गितं सविभ्रान्तम् ।
दृष्टिं निपातयन्ती मयि स्विताग्रे मणिस्निग्धा ॥

p. 13. Stanza 22.

अमृतरसमयीव ह्यभावादतिदवीयया सुरामयीव ।
शशिकिरणमयीव कान्तिलक्ष्या कुवलयरेणुमयीव सौकुमार्यात् ॥

*Note*—The Act does not end here according to the Ms. The colophon इति चतुर्थोऽङ्कः comes after three more stanzas. But I end the Act here, since the sense requires it.